# Amarakosha Thesaurus Chapter 2

# અમરકોશ અથવા નામલિઙ્ગાઽનુશાસનં કાણ્ડ ૨

## Document Information

Text title : amarakosho nAmaliNgA.anushAsan Chapter (kANDa) 2

File name : amarfin2.itx

Category : amarakosha, major_works

Location : doc_z_misc_major_works

Author : amarasin.ha

Transliterated by : Avinash Sathaye sohum at ms.uky.edu, Pramod, SV Ganesan

Proofread by : Avinash Sathaye sohum at ms.uky.edu, Pramod, SV Ganesan

Latest update : April 20, 1997

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# અમરકોશ અથવા નામલિઙ્ગાઽનુશાસનં કાણ્ડ ૨

અમરકોશે દ્વિતીયં ભૂમ્યાદિકાણ્ડમ્ ।

## વર્ગભેદાઃ।

(૨.૦.૧) વર્ગાઃ પૃથ્વીપુરક્ષ્માભૃદ્વનૌષધિમૃગાદિભિઃ
(૨.૦.૨) નૃબ્રહ્મક્ષત્રવિટ્ શૂદ્રૈઃ સાઙ્ગોપાઙ્ગૈરિહોદિતાઃ

## ભૂમિવર્ગઃ

(૨.૧.૩) ભૂર્ભૂમિરચલાઽનન્તા રસા વિશ્વમ્ભરા સ્થિતા
(૨.૧.૪) ધરા ધરિત્રી ધરણિઃ ક્ષોણિર્જ્યા કાશ્યપી ક્ષિતિઃ
(૨.૧.૫) સર્વંસહા વસુમતી વસુધોર્વી વસુન્ધરા
(૨.૧.૬) ગોત્રા કુઃ પૃથિવી પૃથ્વી ક્ષ્માઽવનિર્મેદિની મહી
(૨.૧.૭) વિપુલા ગહ્વરી ધાત્રી ગૌરિલા કુમ્ભિની ક્ષમા
(૨.૧.૮) ભૂતધાત્રી રત્નગર્ભા જગતી સાગરામ્બરા
(૨.૧.૯) મૃન્મૃત્તિકા પ્રશસ્તા તુ મૃત્સા મૃત્સ્ના ચ મૃત્તિકા
(૨.૧.૧૦) ઉર્વરા સર્વસસ્યાઢ્યા સ્યાદૂષઃ ક્ષારમૃત્તિકા
(૨.૧.૧૧) ઊષવાનૂષરો દ્વાવપ્યન્યલિઙ્ગૌ સ્થલં સ્થલી
(૨.૧.૧૨) સમાનૌ મરુધન્વાનૌ દ્વે ખિલાપ્રહતે સમે
(૨.૧.૧૩) ત્રિષ્વથો જગતી લોકો વિષ્ટપં ભુવનં જગત્
(૨.૧.૧૪) લોકોઽયં ભારતં વર્ષમ્ શરાવત્યાસ્તુ યોઽવધેઃ
(૨.૧.૧૫) દેશઃ પ્રાગ્દક્ષિણઃ પ્રાચ્ય ઉદીચ્યઃ પશ્ચિમોત્તરઃ
(૨.૧.૧૬) પ્રત્યન્તો મ્લેચ્છદેશઃ સ્યાન્મધ્યદેશસ્તુ મધ્યમઃ
(૨.૧.૧૭) આર્યાવર્તઃ પુણ્યભૂમિર્મધ્યં વિન્ધ્યહિમાલયોઃ

(૨.૧.૧૮) નીવૃજ્જનપદો દેશવિષયૌ તૂઽપવર્તનમ્
(૨.૧.૧૯) ત્રિષ્વાગોષ્ઠાન્નઽપ્રાયે નડ્વાન્નડ્વલ ઇત્યપિ
(૨.૧.૨૦) કુમુદ્વાન્કુમુદપ્રાયે વેતસ્વાન્બહુવેતસે
(૨.૧.૨૧) શાદ્વલઃ શાદહરિતે સજમ્બાલે તુ પઙ્કિલઃ
(૨.૧.૨૨) જલપ્રાયમનૂપં સ્યાત્પુંસિ કચ્છસ્તથાવિધઃ
(૨.૧.૨૩) સ્ત્રી શર્કરા શર્કરિલઃ શાર્કરઃ શર્કરાવતિ
(૨.૧.૨૪) દેશ એવાદિમાવેવમુન્નેયાઃ સિકતાવતિ
(૨.૧.૨૫) દેશો નદ્યમ્બુવૃષ્ટ્યમ્બુસંપન્નવ્રીહિપાલિતઃ
(૨.૧.૨૬) સ્યાન્નદીમાતૃકો દેવમાતૃકશ્ચ યથાક્રમમ્
(૨.૧.૨૭) સુરાજ્ઞિ દેશે રાજન્વાન્સ્યાત્તતોઽન્યત્ર રાજવાન્
(૨.૧.૨૮) ગોષ્ઠં ગોસ્થાનકં તત્તુ ગૌષ્ઠીનં ભૂતપૂર્વકમ્
(૨.૧.૨૯) પર્યન્તભૂઃ પરિસરઃ સેતુરાલૌ સ્ત્રિયાં પુમાન્
(૨.૧.૩૦) વામલૂરશ્ચ નાકુશ્ચ વલ્મીકં પુંનપુંસકમ્
(૨.૧.૩૧) અયનમ્ વર્ત્મ માર્ગાધ્વપન્થાનઃ પદવી સૃતિઃ
(૨.૧.૩૨) સરણિઃ પદ્ધતિઃ પદ્યા વર્તન્યેકપદીતિ ચ
(૨.૧.૩૩) અતિપન્થાઃ સુપન્થાશ્ચ સત્પથશ્ચાર્ચિતેઽધ્વનિ
(૨.૧.૩૪) વ્યધ્વો દુરધ્વો વિપથઃ કદધ્વા કાપથઃ સમાઃ
(૨.૧.૩૫) અપન્થાસ્ત્વપથં તુલ્યે શ ૃઙ્ગાટકચતુષ્પથે
(૨.૧.૩૬) પ્રાન્તરં દૂરશૂન્યોઽધ્વા કાન્તારં વર્ત્મ દુર્ગમમ્
(૨.૧.૩૭) ગવ્યૂતિઃ સ્ત્રી ક્રોશયુગં નલ્વઃ કિષ્કુચતુઃશતમ્
(૨.૧.૩૮) ઘણ્ટાપથઃ સંસરણં તત્પુરસ્યોપનિષ્કરમ્
(૨.૧.૩૯) દ્યાવાપૃથિવ્યૌ રોદસ્યૌ દ્યાવાભૂમી ચ રોદસી
(૨.૧.૪૦) દિવસ્પૃથિવ્યૌ ગઞ્જા તુ રુમા સ્યાલ્લવણાકરઃ । ઇતિ ભૂમિવર્ગઃ

## પુરવર્ગઃ ।

(૨.૨.૪૧) પૂઃ સ્ત્રી પુરીનગર્યૌ વા પત્તનં પુટભેદનમ્ । અથ પુરવર્ગઃ
(૨.૨.૪૨) સ્થાનીયં નિગમોઽન્યત્તુ યન્મૂલનગરાત્પુરમ્
(૨.૨.૪૩) તચ્છાખાનગરં વેશો વેશ્યાજનસમાશ્રયઃ
(૨.૨.૪૪) આપણસ્તુ નિષદ્યાયાં વિપણિઃ પણ્યવીથિકા
(૨.૨.૪૫) રથ્યા પ્રતોલી વિશિખા સ્યાચ્ચયો વપ્રમસ્ત્રિયામ્
(૨.૨.૪૬) પ્રાકારો વરણઃ સાલઃ પ્રાચીનં પ્રાતન્તો વૃતિઃ

(૨.૨.૪૭) ભિત્તિઃ સ્ત્રી કુડ્યમેડૂકં યદન્તર્ન્યસ્તકીકસમ્
(૨.૨.૪૮) ગૃહં ગેહોદવસિતં વેશ્મ સદ્મ નિકેતનમ્
(૨.૨.૪૯) નિશાન્તં પસ્ત્યસદનં ભવનાગારમન્દિરમ્
(૨.૨.૫૦) ગૃહાઃ પુંસિ ચ ભૂમ્ન્યેવ નિકાય્યનિલયાલયાઃ
(૨.૨.૫૧) વાસઃ કુટી દ્વયોઃ શાલા સભા સંજવનં ત્વિદમ્
(૨.૨.૫૨) ચતુઃશાલં મુનીનાં તુ પર્ણશાલોટજોઽસ્ત્રિયામ્
(૨.૨.૫૩) ચૈત્યમાયતનં તુલ્યે વાજિશાલા તુ મન્દુરા
(૨.૨.૫૪) આવેશનં શિલ્પિશાલા પ્રપા પાનીયશાલિકા
(૨.૨.૫૫) મઠશ્છાત્રાદિનિલયો ગઞ્જા તુ મદિરાગૃહમ્
(૨.૨.૫૬) ગર્ભાગારં વાસગૃહમરિષ્ટં સૂતિકાગૃહમ્
(૨.૨.૫૭) કુટ્ટિમોઽસ્ત્રી નિબદ્ધા ભૂશ્ચન્દ્રશાલા શિરોગૃહમ્
(૨.૨.૫૮) વાતાયનં ગવાક્ષોઽથ મણ્ડપોઽસ્ત્રી જનાશ્રયઃ
(૨.૨.૫૯) હર્મ્યાદિ ધનિનાં વાસઃ પ્રાસાદો દેવભૂભુજામ્
(૨.૨.૬૦) સૌધોઽસ્ત્રી રાજસદનમુપકાર્યોપકારિકા
(૨.૨.૬૧) સ્વસ્તિકઃ સર્વતોભદ્રો નન્દ્યાવર્તાદયોઽપિ ચ
(૨.૨.૬૨) વિચ્છન્દકઃ પ્રભેદા હિ ભવન્તીશ્વરસદ્મનામ્
(૨.૨.૬૩) સ્ત્ર્યગારં ભૂભુજામન્તઃપુરં સ્યાદવરોધનમ્
(૨.૨.૬૪) શુદ્ધાન્તશ્ચાવરોધશ્ચ સ્યાદટ્ટઃ ક્ષૌમમસ્ત્રિયામ્
(૨.૨.૬૫) પ્રઘાણપ્રઘણાલિન્દા બહિર્દ્વારપ્રકોષ્ઠકે
(૨.૨.૬૬) ગૃહાવગ્રહણી દેહલ્યઙ્ગણં ચત્વરાજિરે
(૨.૨.૬૭) અધસ્તાદ્દારુણિ શિલા નાસા દારુપરિ સ્થિતમ્
(૨.૨.૬૮) પ્રચ્છન્નમન્તર્દ્વારં સ્યાત્પક્ષદ્વારં તુ પક્ષકમ્
(૨.૨.૬૯) વલીકનીધ્રે પટલપ્રાન્તેઽથ પટલં છદિઃ
(૨.૨.૭૦) ગોપાનસી તુ વલભી છાદને વક્રદારુણિ
(૨.૨.૭૧) કપોતપાલિકાયાં તુ વિટઙ્કં પુંનપુંસકમ્
(૨.૨.૭૨) સ્ત્રી દ્વાર્દ્વારં પ્રતીહારઃ સ્યાદ્વિતર્દિસ્તુ વેદિકા
(૨.૨.૭૩) તોરણોઽસ્ત્રી બહિર્દ્વારમ્ પુરદ્વારં તુ ગોપુરમ્
(૨.૨.૭૪) કૂટં પૂર્દ્વારિ યદ્ધસ્તિનખસ્તસ્મિન્નથ ત્રિષુ
(૨.૨.૭૫) કપાટમરરં તુલ્યે તદ્વિષ્કમ્ભોઽર્ગલં ન ના
(૨.૨.૭૬) આરોહણં સ્યાત્સોપાનં નિશ્રેણિસ્ત્વધિરોહિણી
(૨.૨.૭૭) સંમાર્જની શોધની સ્યાત્સંકરોઽવકરસ્તથા
(૨.૨.૭૮) ક્ષિપ્તે મુખં નિઃસરણં સંનિવેશો નિકર્ષણમ્

(૨.૨.૭૯) સમૌ સંવસથગ્રામૌ વેશ્મભૂર્વાસ્તુરસ્ત્રિયામ્

(૨.૨.૮૦) ગ્રામાન્ત ઉપશલ્યં સ્યાત્સીમસીમે સ્ત્રિયામુભે

(૨.૨.૮૧) ઘોષ આભીરપલ્લી સ્યાત્પક્કણઃ શબરાલયઃ । ઇતિ પુરવર્ગઃ

## શૈલવર્ગઃ ।

(૨.૩.૮૨) મહીધ્રે શિખરિક્ષ્માભૃદહાર્યધરપર્વતાઃ । અથ શૈલવર્ગઃ

(૨.૩.૮૩) અદ્રિગોત્રગિરિગ્રાવાચલશૈલશિલોચ્ચયાઃ

(૨.૩.૮૪) લોકાલોકશ્ચક્રવાલસ્ત્રિકૂટસ્ત્રિકકુત્સમૌ

(૨.૩.૮૫) અસ્તસ્તુ ચરમક્ષ્માભૃદુદયઃ પૂર્વપર્વતઃ

(૨.૩.૮૬) હિમવાન્નિષધો વિન્ધ્યો માલ્યવાન્પારિયાત્રિકઃ

(૨.૩.૮૭) ગન્ધમાદનમન્યે ચ હેમકૂટાદયો નગાઃ

(૨.૩.૮૮) પાષાણપ્રસ્તરગ્રાવોપલાશ્માનઃ શિલા દૃષત્

(૨.૩.૮૯) કૂટોઽસ્ત્રી શિખરં શૃઙ્ગં પ્રપાતસ્ત્વતટો ભૃગુઃ

(૨.૩.૯૦) કટકોઽસ્ત્રી નિતમ્બોઽદ્રેઃ સ્નુઃ પ્રસ્થઃ સાનુરસ્ત્રિયામ્

(૨.૩.૯૧) ઉત્સઃ પ્રસ્રવણં વારિપ્રવાહો નિર્ઝરો ઝરઃ

(૨.૩.૯૨) દરી તુ કન્દરો વા સ્ત્રી દેવખાતબિલે ગુહા

(૨.૩.૯૩) ગહ્વરં ગણ્ડશૈલાસ્તુ ચ્યુતાઃ સ્થૂલોપલા ગિરેઃ

(૨.૩.૯૪) દન્તકાસ્તુ બહિસ્તિર્યક્ પ્રદેશાન્નિર્ગતા ગિરેઃ

(૨.૩.૯૫) ખનિઃ સ્ત્રિયામાકરઃ સ્યાત્પાદાઃ પ્રત્યન્તપર્વતાઃ

(૨.૩.૯૬) ઉપત્યકાદ્રેરાસન્ના ભૂમિરૂર્ધ્વમધિત્યકા

(૨.૩.૯૭) ધાતુર્મનઃશિલાદ્યદ્રેર્ગૈરિકં તુ વિશેષતઃ

(૨.૩.૯૮) નિકુઞ્જકુઞ્જૌ વા ક્લીબે લતાદિપિહિતોદરે । ઇતિ શૈલવર્ગઃ

## વનૌષધિવર્ગઃ ।

(૨.૪.૯૯) અટવ્યરણ્યં વિપિનં ગહનં કાનનં વનમ્ । અથ વનૌષધિવર્ગઃ

(૨.૪.૧૦૦) મહારણ્યમરણ્યાની ગૃહારામાસ્તુ નિષ્કુટાઃ

(૨.૪.૧૦૧) આરામઃ સ્યાદુપવનં કૃત્રિમં વનમેવ યત્

(૨.૪.૧૦૨) અમાત્યગણિકાગેહોપવને વૃક્ષવાટિકા

(૨.૪.૧૦૩) પુમાનાક્રીડ ઉદ્યાનં રાજ્ઞઃ સાધારણં વનમ્

(૨.૪.૧૦૪) સ્યાદેતદેવ પ્રમદવનમન્તઃપુરોચિતમ્

(૨.૪.૧૦૫) વીથ્યાલિરાવલિઃ પઙ્ક્તિઃ શ્રેણી લેખાસ્તુ રાજયઃ

(૨.૪.૧૦૬) વન્યા વનસમૂહે સ્યાદઙ્કુરોઽભિનવોદ્ભિદિ

(૨.૪.૧૦૭) વૃક્ષો મહીરુહઃ શાખી વિટપી પાદપસ્તરુઃ

(૨.૪.૧૦૮) અનોકહઃ કુટઃ શાલઃ પલાશી દ્રુદ્રુમાગમાઃ

(૨.૪.૧૦૯) વાનસ્પત્યઃ ફલૈઃ પુષ્પાત્તૈરપુષ્પાદ્વનસ્પતિઃ

(૨.૪.૧૧૦) ઓષધ્યઃ ફલપાકાન્તાઃ સ્યુરવન્ધ્યહ્ ફલેગ્રહિઃ

(૨.૪.૧૧૧) વન્ધ્યોઽફલોઽવકેશી ચ ફલવાન્ફલિનઃ ફલી

(૨.૪.૧૧૨) પ્રફુલ્લોત્ફુલ્લસંફુલ્લવ્યાકોશવિકચસ્ફુટાઃ

(૨.૪.૧૧૩) ફુલ્લશ્ચૈતે વિકસિતે સ્યુરવન્ધ્યાદયસ્ત્રિષુ

(૨.૪.૧૧૪) સ્થાણુર્વા ના ધ્રુવઃ શઙ્કુર્હ્રસ્વશાખાશિફઃ ક્ષુપઃ

(૨.૪.૧૧૫) અપ્રકાણ્ડે સ્તમ્બગુલ્મૌ વલ્લી તુ વ્રતતિર્લતા

(૨.૪.૧૧૬) લતા પ્રતાનિની વીરુદ્ગુલ્મિન્યુલપ ઇત્યપિ

(૨.૪.૧૧૭) નગાદ્યારોહ ઉચ્છ્રાય ઉત્સેધશ્ચોચ્છ્રયશ્ચ સઃ

(૨.૪.૧૧૮) અસ્ત્રી પ્રકાણ્ડઃ સ્કન્ધઃ સ્યાન્મૂલાચ્છાખાવધિસ્તરોઃ

(૨.૪.૧૧૯) સમે શાખાલતે સ્કન્ધશાખાશાલે શિફાજટે

(૨.૪.૧૨૦) શાખાશિફાવરોહઃ સ્યાન્મૂલાચ્ચાગ્રં ગતા લતા

(૨.૪.૧૨૧) શિરોગ્રં શિખરં વા ના મૂલં બુધ્નોઽઙ્ઘ્રિનામકઃ

(૨.૪.૧૨૨) સારો મજ્જા નરિ ત્વક્સ્ત્રી વલ્કં વલ્કલમસ્ત્રિયામ્

(૨.૪.૧૨૩) કાષ્ઠં દાર્વિન્ધનં ત્વેધ ઇધ્મમેધઃ સમિત્સ્ત્રિયામ્

(૨.૪.૧૨૪) નિષ્કુહઃ કોટરં વા ના વલ્લરિર્મઞ્જરિઃ સ્ત્રિયૌ

(૨.૪.૧૨૫) પત્રં પલાશં છદનં દલં પર્ણં છદઃ પુમાન્

(૨.૪.૧૨૬) પલ્લવોઽસ્ત્રી કિસલયં વિસ્તારો વિટપોઽસ્ત્રિયામ્

(૨.૪.૧૨૭) વૃક્ષાદીનાં ફલં સસ્યં વૃન્તં પ્રસવબન્ધનમ્

(૨.૪.૧૨૮) આમે ફલે શલાટુઃ સ્યાચ્છુષ્કે વાનમુભે ત્રિષુ

(૨.૪.૧૨૯) ક્ષારકો જાલકં ક્લીબે કલિકા કોરકઃ પુમાન્

(૨.૪.૧૩૦) સ્યાદ્ગુચ્છકસ્તુ સ્તબકઃ કુઙ્મલો મુકુલોઽસ્ત્રિયામ્

(૨.૪.૧૩૧) સ્ત્રિયઃ સુમનસઃ પુષ્પં પ્રસૂનં કુસુમં સુમમ્

(૨.૪.૧૩૨) મકરન્દઃ પુષ્પરસઃ પરાગઃ સુમનોરજઃ

(૨.૪.૧૩૩) દ્વિહીનં પ્રસવે સર્વં હરીતક્યાદયઃ સ્ત્રિયામ્

(૨.૪.૧૩૪) આશ્વત્થવૈણવપ્લાક્ષનૈયગ્રોધૈઙ્ગુદમ્ ફલે

(૨.૪.૧૩૫) બાર્હતં ચ ફલે જમ્બ્વા જમ્બૂઃ સ્ત્રી જમ્બુ જામ્બવમ્

(૨.૪.૧૩૬) પુષ્પે જાતીપ્રભૃતયઃ સ્વલિઙ્ગાઃ વ્રીહયઃ ફલે

(૨.૪.૧૩૭) વિદાર્યાદ્યાસ્તુ મૂલેઽપિ પુષ્પે ક્લીબેઽપિ પાટલા
(૨.૪.૧૩૮) બોધિદ્રુમશ્ચલદલઃ પિપ્પલઃ કુઞ્જરાશનઃ
(૨.૪.૧૩૯) અશ્વત્થેઽથ કપિત્થે સ્યુર્દધિત્થગ્રાહિમન્મથાઃ
(૨.૪.૧૪૦) તસ્મિન્દધિફલઃ પુષ્પફલદન્તશઠાવપિ
(૨.૪.૧૪૧) ઉદુમ્બરો જન્તુફલો યજ્ઞાઙ્ગો હેમદુગ્ધકઃ
(૨.૪.૧૪૨) કોવિદારે ચમરિકઃ કુદ્દાલો યુગપત્રકઃ
(૨.૪.૧૪૩) સપ્તપર્ણો વિશાલત્વક્ શારદો વિષમચ્છદઃ
(૨.૪.૧૪૪) આરગ્વધે રાજવૃક્ષશમ્પાકચતુરઙ્ગુલાઃ
(૨.૪.૧૪૫) આરેવતવ્યાધિઘાતકૃતમાલસુવર્ણકાઃ
(૨.૪.૧૪૬) સ્યુર્જમ્બીરે દન્તશઠજમ્ભજમ્ભીરજમ્ભલાઃ
(૨.૪.૧૪૭) વરુણો વરણઃ સેતુસ્તિક્તશાકઃ કુમારકઃ
(૨.૪.૧૪૮) પુંનાગે પુરુષસ્તુઙ્ગઃ કેસરો દેવવલ્લભઃ
(૨.૪.૧૪૯) પારિભદ્રે નિમ્બતરુર્મન્દારઃ પારિજાતકઃ
(૨.૪.૧૫૦) તિનિશે સ્યન્દનો નેમી રથદ્રુરતિમુક્તકઃ
(૨.૪.૧૫૧) વઞ્જુલશ્ચિત્રકૃચ્ચાથ દ્વૌ પીતનકપીતનૌ
(૨.૪.૧૫૨) આમ્રાતકે મધૂકે તુ ગુડપુષ્પમધુદ્રુમૌ
(૨.૪.૧૫૩) વાનપ્રસ્થમધુષ્ઠીલૌ જલજેઽત્ર મધૂલકઃ
(૨.૪.૧૫૪) પીલૌ ગુડફલઃ સ્રંસી તસ્મિંસ્તુ ગિરિસમ્ભવે
(૨.૪.૧૫૫) અક્ષોટકન્દરાલૌ દ્વાવઙ્કોટે તુ નિકોચકઃ
(૨.૪.૧૫૬) પલાશે કિંશુકઃ પર્ણો વાતપોતોઽથ વેતસે
(૨.૪.૧૫૭) રથાભ્રપુષ્પવિદુરશીતવાનીરવઞ્જુલાઃ
(૨.૪.૧૫૮) દ્વૌ પરિવ્યાધવિદુલૌ નાદેયી ચામ્બુવેતસે
(૨.૪.૧૫૯) શોભાઞ્જને શિગ્રુતીક્ષ્ણગન્ધકાક્ષીવમોચકાઃ
(૨.૪.૧૬૦) રક્તોઽસૌ મધુશિગ્રુઃ સ્યાદરિષ્ટઃ ફેનિલઃ સમૌ
(૨.૪.૧૬૧) બિલ્વે શાણ્ડિલ્યશૈલૂષૌ માલૂરશ્રીફલાવપિ
(૨.૪.૧૬૨) પ્લક્ષો જટી પર્કટી સ્યાન્ન્યગ્રોધો બહુપાદ્વટઃ
(૨.૪.૧૬૩) ગાલવઃ શાબરો લોધ્રસ્તિરીટસ્તિલ્વમાર્જનૌ
(૨.૪.૧૬૪) આમ્રશ્ચૂતો રસાલોઽસૌ સહકારોઽતિસૌરભઃ
(૨.૪.૧૬૫) કુમ્ભોલૂખલકં ક્લીબે કૌશિકો ગુગ્ગુલુઃ પુરઃ
(૨.૪.૧૬૬) શેલુઃ શ્લેષ્માતકઃ શીત ઉદ્દાલો બહુવારકઃ
(૨.૪.૧૬૭) રાજાદનં પ્રિયાલઃ સ્યાત્સન્નકદ્રુર્ધનુઃપટઃ
(૨.૪.૧૬૮) ગમ્ભારી સર્વતોભદ્રા કાશ્મરી મધુપર્ણિકા

(૨.૪.૧૬૯) શ્રીપર્ણી ભદ્રપર્ણી ચ કાશ્મર્યશ્ચાપ્યથ દ્વયોઃ

(૨.૪.૧૭૦) કર્કન્ધૂર્બદરી કોલિઃ કોલં કુવલફેનિલે

(૨.૪.૧૭૧) સૌવીરં બદરં ઘોણ્ટાપ્યથ સ્યાત્સ્વાદુકણ્ટકઃ

(૨.૪.૧૭૨) વિકઙ્કતઃ સુવાવૃક્ષો ગ્રન્થિલો વ્યાઘ્રપાદપિ

(૨.૪.૧૭૩) ઐરાવતો નાગરઙ્ગો નાદેયી ભૂમિજમ્બુકા

(૨.૪.૧૭૪) તિન્દુકઃ સ્ફૂર્જકઃ કાલસ્કન્ધશ્ચ શિતિસારકે

(૨.૪.૧૭૫) કાકેન્દુઃ કુલકઃ કાકતિન્દુકઃ કાકપીલુકે

(૨.૪.૧૭૬) ગોલીઢો ઝાટલો ઘણ્ટાપાટલિર્મોક્ષમુષ્કકૌ

(૨.૪.૧૭૭) તિલકઃ ક્ષુરકઃ શ્રીમાન્સમૌ પિચુલઝાવુકૌ

(૨.૪.૧૭૮) શ્રીપર્ણિકા કુમુદિકા કુમ્ભી કૈટર્યકટ્ફલૌ

(૨.૪.૧૭૯) ક્રમુકઃ પટ્ટિકાખ્યઃ સ્યાત્પટ્ટી લાક્ષાપ્રસાદનઃ

(૨.૪.૧૮૦) તૂદસ્તુ યૂપઃ ક્રમુકો બ્રહ્મણ્યો બ્રહ્મદારુ ચ

(૨.૪.૧૮૧) તૂલં ચ નીપપ્રિયકકદમ્બાસ્તુ હરિપ્રિયઃ

(૨.૪.૧૮૨) વીરવૃક્ષોઽરુષ્કરોઽગ્નિમુખી ભલ્લાતકી ત્રિષુ

(૨.૪.૧૮૩) ગર્દભાણ્ડે કન્દરાલકપીતનસુપાર્શ્વકાઃ

(૨.૪.૧૮૪) પ્લક્ષશ્ચ તિન્તિડી ચિઞ્ચામ્લિકાથો પીતસારકે

(૨.૪.૧૮૫) સર્જકાસનબન્ધૂકપુષ્પપ્રિયકજીવકાઃ

(૨.૪.૧૮૬) સાલે તુ સર્જકાર્શ્યાશ્વકર્ણકાઃ સસ્યસમ્બરઃ

(૨.૪.૧૮૭) નદીસર્જો વીરતરુરિન્દ્રદ્રુઃ કકુભોઽર્જુનઃ

(૨.૪.૧૮૮) રાજાદનઃ ફલાધ્યક્ષઃ ક્ષીરિકાયામથ દ્વયોઃ

(૨.૪.૧૮૯) ઇઙ્ગુદી તાપસતરુર્ભૂર્જે ચર્મિમૃદુત્વચૌ

(૨.૪.૧૯૦) પિચ્છિલા પૂરણી મોચા સ્થિરાયુઃ શાલ્મલિર્દ્વયોઃ

(૨.૪.૧૯૧) પિચ્છા તુ શાલ્મલીવેષ્ટે રોચનઃ કૂટશાલ્મલિઃ

(૨.૪.૧૯૨) ચિરબિલ્વો નક્તમાલઃ કરજશ્ચ કરઞ્જકે

(૨.૪.૧૯૩) પ્રકીર્યઃ પૂતિકરજઃ પૂતિકઃ કલિમારકઃ

(૨.૪.૧૯૪) કરઞ્જભેદાઃ ષડ્ગ્રન્થો મર્કટ્યઙ્ગારવલ્લરી

(૨.૪.૧૯૫) રોહી રોહિતકઃ પ્લીહશત્રુર્દાડિમપુષ્પકઃ

(૨.૪.૧૯૬) ગાયત્રી બાલતનયઃ ખદિરો દન્તધાવનઃ

(૨.૪.૧૯૭) અરિમેદો વિટ્ખદિરે કદરઃ ખદિરે સિતે

(૨.૪.૧૯૮) સોમવલ્કોઽપ્યથ વ્યાઘ્રપુચ્છગન્ધર્વહસ્તકૌ

(૨.૪.૧૯૯) એરણ્ડ ઉરુબૂકશ્ચ રુચકશ્ચિત્રકશ્ચ સઃ

(૨.૪.૨૦૦) ચઞ્ચુઃ પઞ્ચાઙ્ગુલો મણ્ડવર્ધમાનવ્યડમ્બકાઃ

(૨.૪.૨૦૧) અલ્પા શમી શમીરઃ સ્યાચ્છમી સક્તુફલા શિવા
(૨.૪.૨૦૨) પિણ્ડીતકો મરુબકઃ શ્વસનઃ કરહાટકઃ
(૨.૪.૨૦૩) શલ્યશ્ચ મદને શક્રપાદપઃ પારિભદ્રકઃ
(૨.૪.૨૦૪) ભદ્રદારુ દ્રુકિલિમં પીતદારુ ચ દારુ ચ
(૨.૪.૨૦૫) પૂતિકાષ્ઠં ચ સપ્ત સ્યુર્દેવદારુણ્યથ દ્વયોઃ
(૨.૪.૨૦૬) પાટલિઃ પાટલામોઘા કાચસ્થાલી ફલેરુહા
(૨.૪.૨૦૭) કૃષ્ણવૃન્તા કુબેરાક્ષી શ્યામા તુ મહિલાહ્વયા
(૨.૪.૨૦૮) લતા ગોવન્દની ગુન્દ્રા પ્રિયઙ્ગુઃ ફલિની ફલી
(૨.૪.૨૦૯) વિષ્વક્સેના ગન્ધફલી કારમ્ભા પ્રિયકશ્ચ સા
(૨.૪.૨૧૦) મણ્ડૂકપર્ણપત્રોર્ણનટકટ્વઙ્ગટુણ્ટુકાઃ
(૨.૪.૨૧૧) સ્યોનાકશુકનાસર્ક્ષદીર્ઘવૃન્તકુટન્નટાઃ
(૨.૪.૨૧૨) અમૃતા ચ વયઃસ્થા ચ ત્રિલિઙ્ગસ્તુ બિભીતકઃ
(૨.૪.૨૧૩) નાક્ષસ્તુષઃ કર્ષફલો ભૂતાવાસઃ કલિદ્રુમઃ
(૨.૪.૨૧૪) અભયા ત્વવ્યથા પથ્યા કાયસ્થા પૂતનામૃતા
(૨.૪.૨૧૫) કરીતકી હૈમવતી ચેતકી શ્રેયસી શિવા
(૨.૪.૨૧૬) પીતદ્રુઃ સરલઃ પૂતિકાષ્ઠં ચાથ દ્રુમોત્પલઃ
(૨.૪.૨૧૭) કર્ણિકારઃ પરિવ્યાધો લકુચો લિકુચો ડહુઃ
(૨.૪.૨૧૮) પનસઃ કણ્ટકિફલો નિચુલો હિજ્જલોઽમ્બુજઃ
(૨.૪.૨૧૯) કાકોદુમ્બરિકા ફલ્ગુર્મલયૂર્જઘનેફલા
(૨.૪.૨૨૦) અરિષ્ટઃ સર્વતોભદ્રહિઙ્ગુનિર્યાસમાલકાઃ
(૨.૪.૨૨૧) પિચુમન્દશ્ચ નિમ્બેઽથ પિચ્છિલાગુરુશિંશપા
(૨.૪.૨૨૨) કપિલા ભસ્મગર્ભા સા શિરીષસ્તુ કપીતનઃ
(૨.૪.૨૨૩) ભણ્ડિલોઽપ્યથ ચામ્પેયશ્ચમ્પકો હેમપુષ્પકઃ
(૨.૪.૨૨૪) એતસ્ય કલિકા ગન્ધફલી સ્યાદથ કેસરે
(૨.૪.૨૨૫) બકુલો વઞ્જુલોઽશોકે સમૌ કરકદાડિમૌ
(૨.૪.૨૨૬) ચામ્પેયઃ કેસરો નાગકેસરઃ કાઞ્ચનાહ્વયઃ
(૨.૪.૨૨૭) જયા જયન્તી તર્કારી નાદેયી વૈજયન્તિકા
(૨.૪.૨૨૮) શ્રીપર્ણમગ્નિમન્થઃ સ્યાત્કણિકા ગણિકારિકા
(૨.૪.૨૨૯) જયોઽથ કુટજઃ શક્રો વત્સકો ગિરિમલ્લિકા
(૨.૪.૨૩૦) એતસ્યૈવ કલિઙ્ગેન્દ્રયવભદ્રયવં ફલે
(૨.૪.૨૩૧) કૃષ્ણપાકફલાવિગ્નસુષેણાઃ કરમર્દકે
(૨.૪.૨૩૨) કાલસ્કન્ધસ્તમાલઃ સ્યાત્તાપિચ્છોઽપ્યથ સિન્દુકે

(૨.૪.૨૩૩) સિન્દુવારેન્દ્રસુરસૌ નિર્ગુણ્ડીન્દ્રાણિકેત્યપિ

(૨.૪.૨૩૪) વેણી ગરા ગરી દેવતાડો જીમૂત ઇત્યપિ

(૨.૪.૨૩૫) શ્રીહસ્તિની તુ ભૂરુણ્ડી તૃણશૂન્યં તુ મલ્લિકા

(૨.૪.૨૩૬) ભૂપદી શીતભીરુશ્ચ સૈવાસ્ફોટા વનોદ્ભવા

(૨.૪.૨૩૭) શેફાલિકા તુ સુવહા નિર્ગુણ્ડી નીલિકા ચ સા

(૨.૪.૨૩૮) સિતાસૌ શ્વેતસુરસા ભૂતવેશ્યથ માગધી

(૨.૪.૨૩૯) ગણિકા યૂથિકામ્બષ્ઠા સા પીતા હેમપુષ્પિકા

(૨.૪.૨૪૦) અતિમુક્તઃ પુણ્ડ્રકઃ સ્યાદ્વાસન્તી માધવી લતા

(૨.૪.૨૪૧) સુમના માલતી જાતિઃ સપ્તલા નવમાલિકા

(૨.૪.૨૪૨) માધ્યં કુન્દં રક્તકસ્તુ બન્ધૂકો બન્ધુજીવકઃ

(૨.૪.૨૪૩) સહા કુમારી તરણિરમ્લાનસ્તુ મહાસહા

(૨.૪.૨૪૪) તત્ર શોણે કુરબકસ્તત્ર પીતે કુરકણ્ટકઃ

(૨.૪.૨૪૫) નીલી ઝિણ્ટી દ્વયોર્બાણા દાસી ચાર્તગલશ્ચ સા

(૨.૪.૨૪૬) સૈરેયકસ્તુ ઝિણ્ટી સ્યાત્તસ્મિન્કુરબકોઽરુણે

(૨.૪.૨૪૭) પીતા કુરણ્ટકો ઝિણ્ટી તસ્મિન્સહચરી દ્વયોઃ

(૨.૪.૨૪૮) ઓણ્ડ્રપુષ્પં જપાપુષ્પં વજ્રપુષ્પં તિલસ્ય યત્

(૨.૪.૨૪૯) પ્રતિહાસશતપ્રાસચણ્ડાતહયમારકાઃ

(૨.૪.૨૫૦) કરવીરે કરીરે તુ ક્રકરગ્રન્થિલાવુભૌ

(૨.૪.૨૫૧) ઉન્મત્તઃ કિતવો ધૂર્તો ધત્તૂરઃ કનકાહ્વયઃ

(૨.૪.૨૫૨) માતુલો મદનશ્ચાસ્ય ફલે માતુલપુત્રકઃ

(૨.૪.૨૫૩) ફલપૂરો બીજપૂરો રુચકો માતુલુઙ્ગકે

(૨.૪.૨૫૪) સમીરણો મરુબકઃ પ્રસ્થપુષ્પઃ ફણિજ્જકઃ

(૨.૪.૨૫૫) જમ્બીરોઽપ્યથ પર્ણાસે કઠિઞ્જરકુઠેરકૌ

(૨.૪.૨૫૬) સિતેઽર્જકોઽત્ર પાઠી તુ ચિત્રકો વહ્નિસંજ્ઞકઃ

(૨.૪.૨૫૭) અર્કાહ્વવસુકાસ્ફોટગણરૂપવિકીરણાઃ

(૨.૪.૨૫૮) મન્દારશ્ચાર્કપર્ણોઽત્ર શુક્લેઽલર્કપ્રતાપસૌ

(૨.૪.૨૫૯) શિવમલ્લી પાશુપત એકાષ્ઠીલો બુકો વસુઃ

(૨.૪.૨૬૦) વન્દા વૃક્ષાદની વૃક્ષરુહા જીવન્તિકેત્યપિ

(૨.૪.૨૬૧) વત્સાદની છિન્નરુહા ગુડૂચી તન્ત્રિકામૃતા

(૨.૪.૨૬૨) જીવન્તિકા સોમવલ્લી વિશલ્યા મધુપર્ણ્યપિ

(૨.૪.૨૬૩) મૂર્વા દેવી મધુરસા મોરટા તેજની સ્રવા

(૨.૪.૨૬૪) મધૂલિકા મધુશ્રેણી ગોકર્ણી પીલુપર્ણ્યપિ

(૨.૪.૨૬૫) પાટામ્બષ્ઠા વિદ્ધકર્ણી સ્થાપની શ્રેયસી રસા
(૨.૪.૨૬૬) એકાષ્ઠીલા પાપચેલી પ્રાચીના વનતિક્તિકા
(૨.૪.૨૬૭) કટુઃ કટમ્ભરાશોકરોહિણી કટુરોહિણી
(૨.૪.૨૬૮) મત્સ્યપિત્તા કૃષ્ણભેદી ચક્રાઙ્ગી શકુલાદની
(૨.૪.૨૬૯) આત્મગુપ્તાજહાવ્યણ્ડા કણ્ડૂરા પ્રાવૃષાયણી
(૨.૪.૨૭૦) ઋષ્યપ્રોક્તા શૂકશિમ્બિઃ કપિકચ્છુશ્ચ મર્કટી
(૨.૪.૨૭૧) ચિત્રોપચિત્રા ન્યગ્રોધી દ્રવન્તી શમ્બરી વૃશા
(૨.૪.૨૭૨) પ્રત્યક્શ્રેણી સુતશ્રેણી રણ્ડા મૂષિકપર્ણ્યપિ
(૨.૪.૨૭૩) અપામાર્ગઃ શૈખરિકો ધામાર્ગવમયૂરકૌ
(૨.૪.૨૭૪) પ્રત્યક્પર્ણી કેશપર્ણી કિણિહી ખરમઞ્જરી
(૨.૪.૨૭૫) હઞ્જિકા બ્રાહ્મણી પદ્મા ભર્ગી બ્રાહ્મણયષ્ટિકા
(૨.૪.૨૭૬) અઙ્ગારવલ્લી બાલેયશાકબર્બરવર્ધકાઃ
(૨.૪.૨૭૭) મઞ્જિષ્ઠા વિકસા જિઙ્ગી સમઙ્ગા કાલમેષિકા
(૨.૪.૨૭૮) મણ્ડૂકપર્ણી મણ્ડીરી ભણ્ડી યોજનવલ્લ્યપિ
(૨.૪.૨૭૯) યાસો યવાસો દુઃસ્પર્શો ધન્વયાસઃ કુનાશકઃ
(૨.૪.૨૮૦) રોદની કચ્છુરાનન્તા સમુદ્રાન્તા દુરાલભા
(૨.૪.૨૮૧) પૃશ્નિપર્ણી પૃથક્પર્ણી ચિત્રપર્ણ્યઙ્ઘ્રિવલ્લિકા
(૨.૪.૨૮૨) ક્રોષ્ટુવિન્ના સિંહપુચ્છી કલશી ધાવની ગુહા
(૨.૪.૨૮૩) નિદિગ્ધિકા સ્પૃશી વ્યાઘ્રી બૃહતી કણ્ટકારિકા
(૨.૪.૨૮૪) પ્રચોદની કુલી ક્ષુદ્રા દુઃસ્પર્શા રાષ્ટ્રિકેત્યપિ
(૨.૪.૨૮૫) નીલી કાલા ક્લીતકિકા ગ્રામીણા મધુપર્ણિકા
(૨.૪.૨૮૬) રઞ્જની શ્રીફલી તુત્થા દ્રોણી દોલા ચ નીલિની
(૨.૪.૨૮૭) અવલ્ગુજઃ સોમરાજી સુવલ્લિઃ સોમવલ્લિકા
(૨.૪.૨૮૮) કાલમેષી કૃષ્ણફલી બાકુચી પૂતિફલ્યપિ
(૨.૪.૨૮૯) કૃષ્ણોપકુલ્યા વૈદેહી માગધી ચપલા કણા
(૨.૪.૨૯૦) ઉષણા પિપ્પલી શૌણ્ડી કોલાથ કરિપિપ્પલી
(૨.૪.૨૯૧) કપિવલ્લી કોલવલ્લી શ્રેયસી વશિરઃ પુમાન્
(૨.૪.૨૯૨) ચવ્યં તુ ચવિકા કાકચિઞ્ચીગુઞ્જે તુ કૃષ્ણલા
(૨.૪.૨૯૩) પલંકષા ત્વિક્ષુગન્ધા શ્વદંષ્ટ્રા સ્વાદુકણ્ટકઃ
(૨.૪.૨૯૪) ગોકણ્ટકો ગોક્ષુરકો વનશ◌ૃન્ઙ્ગાટ ઇત્યપિ
(૨.૪.૨૯૫) વિશ્વા વિષા પ્રતિવિષાતિવિષોપવિષારુણા
(૨.૪.૨૯૬) શ◌ૃન્ગી મહૌષધં ચાથ ક્ષીરાવી દુગ્ધિકા સમે

(૨.૪.૨૯૭) શતમૂલી બહુસુતાભીરૂરિન્દીવરી વરી

(૨.૪.૨૯૮) ઋષ્યપ્રોક્તાભીરુપત્રીનારાયણ્યઃ શતાવરી

(૨.૪.૨૯૯) અહેરુરથ પીતદ્રુકાલીયકહરિદ્રવઃ

(૨.૪.૩૦૦) દાર્વી પચંપચા દારુહરિદ્રા પર્જનીત્યપિ

(૨.૪.૩૦૧) વચોગ્રગન્ધા ષડ્ગ્રન્થા ગોલોમી શતપર્વિકા

(૨.૪.૩૦૨) શુક્લા હૈમવતી વૈધ્યમાતૃસિંહ્યૌ તુ વાશિકા

(૨.૪.૩૦૩) વૃષોઽટરૂષઃ સિંહાસ્યો વાસકો વાજિદન્તકઃ

(૨.૪.૩૦૪) આસ્ફોટા ગિરિકર્ણી સ્યાદ્વિષ્ણુક્રાન્તાપરાજિતા

(૨.૪.૩૦૫) ઇક્ષુગન્ધા તુ કાણ્ડેક્ષુકોકિલાક્ષેક્ષુરક્ષુરાઃ

(૨.૪.૩૦૬) શાલેયઃ સ્યાચ્છીતશિવશ્છત્રા મધુરિકા મિસિઃ

(૨.૪.૩૦૭) મિશ્રેયાપ્યથ સીહુણ્ડો વજ્રઃ સ્નુક્સ્ત્રી સ્નુહી ગુડા

(૨.૪.૩૦૮) સમન્તદુગ્ધાથો વેલ્લમમોઘા ચિત્રતણ્ડુલા

(૨.૪.૩૦૯) તણ્ડુલશ્ચ કૃમિઘ્નશ્ચ વિડઙ્ગં પુંનપુંસકમ્

(૨.૪.૩૧૦) બલા વાટ્યાલકા ઘણ્ટારવા તુ શણપુષ્પિકા

(૨.૪.૩૧૧) મૃદ્વીકા ગોસ્તની દ્રાક્ષા સ્વાદ્વી મધુરસેતિ ચ

(૨.૪.૩૧૨) સર્વાનુભૂતિઃ સરલા ત્રિપુટા ત્રિવૃતા ત્રિવૃત્

(૨.૪.૩૧૩) ત્રિભણ્ડી  રોચની શ્યામાપાલિન્ધ્યૌ તુ સુષેણિકા

(૨.૪.૩૧૪) કાલા મસૂરવિદલાર્ધચન્દ્રા કાલમેષિકા

(૨.૪.૩૧૫) મધુકં ક્લીતકં યષ્ટિમધુકં મધુયષ્ટિકા

(૨.૪.૩૧૬) વિદારી ક્ષીરશુક્લેક્ષુગન્ધા ક્રોષ્ટી તુ યા સિતા

(૨.૪.૩૧૭) અન્યા ક્ષીરવિદારી સ્યાન્મહાશ્વેતર્ક્ષગન્ધિકા

(૨.૪.૩૧૮) લાઙ્ગલી શારદી તોયપિપ્પલી શકુલાદની

(૨.૪.૩૧૯) ખરાશ્વા કારવી દીપ્યો મયૂરો લોચમસ્તકઃ

(૨.૪.૩૨૦) ગોપી શ્યામા શારિવા સ્યાદનન્તોત્પલશારિવા

(૨.૪.૩૨૧) યોગ્યમૃદ્ધિઃ સિદ્ધિલક્ષ્મ્યૌ વૃદ્ધેરપ્યાહ્વયા ઇમે

(૨.૪.૩૨૨) કદલી વારણબુસા રમ્ભા મોચાંશુમત્ફલા

(૨.૪.૩૨૩) કાષ્ઠીલા મુદ્ગપર્ણી તુ કાકમુદ્ગા સહેત્યપિ

(૨.૪.૩૨૪) વાર્તાકી હિઙ્ગુલી સિંહી ભણ્ટાકી દુષ્પ્રધર્ષિણી

(૨.૪.૩૨૫) નાકુલી સુરસા રાસ્ના સુગન્ધા ગન્ધનાકુલી

(૨.૪.૩૨૬) નકુલેષ્ટા ભુજંગાક્ષી છત્રાકી સુવહા ચ સા

(૨.૪.૩૨૭) વિદારિગન્ધાંશુમતી સાલપર્ણી સ્થિરા ધ્રુવા

(૨.૪.૩૨૮) તુણ્ડિકેરી સમુદ્રાન્તા કાર્પાસી બદરેતિ ચ

(૨.૪.૩૨૯) ભારદ્વાજી તુ સા વન્યા શ‍ૃઙ્ગી તુ ઋષભો વૃશઃ

(૨.૪.૩૩૦) ગાઙ્ગેરુકી નાગબલા ઝષા હ્રસ્વગવેધુકા

(૨.૪.૩૩૧) ધામાર્ગવો ઘોશકઃ સ્યાન્મહાજાલી સ પીતકઃ ૮૮૩

(૨.૪.૩૩૨) જ્યોત્સ્ની પટોલિકા જાલી નાદેયી ભૂમિજમ્બુકા

(૨.૪.૩૩૩) સ્યાલ્લાઙ્ગલિક્યગ્નિશિખા કાકાઙ્ગી કાકનાસિકા

(૨.૪.૩૩૪) ગોધાપદી તુ સુવહા મુસલી તાલમૂલિકા

(૨.૪.૩૩૫) અજશ‍ૃઙ્ગી વિષાણી સ્યાદ્ગોજિહ્વાદાર્વિકે સમે

(૨.૪.૩૩૬) તામ્બૂલવલ્લી તમ્બૂલી નાગવલ્લ્યપ્યથ દ્વિજા

(૨.૪.૩૩૭) હરેણૂ રેણુકા કૌન્તી કપિલા ભસ્મગન્ધિની

(૨.૪.૩૩૮) એલાવાલુકમૈલેયં સુગન્ધિ હરિવાલુકમ્

(૨.૪.૩૩૯) વાલુકં ચાથ પાલઙ્ક્યાં મુકુન્દઃ કુન્દકુન્દુરૂ

(૨.૪.૩૪૦) બાલં હ્રીબેરબર્હિષ્ઠોદીચ્યં કેશામ્બુનામ ચ

(૨.૪.૩૪૧) કાલાનુસાર્યવૃદ્ધાશ્મપુષ્પશીતશિવાનિ તુ

(૨.૪.૩૪૨) શૈલેયં તાલપર્ણી તુ દૈત્યા ગન્ધકુટી મુરા

(૨.૪.૩૪૩) ગન્ધિની ગજભક્ષ્યા તુ સુવહા સુરભી રસા

(૨.૪.૩૪૪) મહેરણા કુન્દુરુકી સલ્લકી હ્લાદિનીતિ ચ

(૨.૪.૩૪૫) અગ્નિજ્વાલાસુભિક્ષે તુ ધાતકી ધાતુપુષ્પિકા

(૨.૪.૩૪૬) પૃથ્વીકા ચન્દ્રવાલૈલા નિષ્કુટિર્બહિલાથ સા

(૨.૪.૩૪૭) સૂક્ષ્મોપકુઞ્ચિકા તુત્થા કોરઙ્ગી ત્રિપુટા ત્રુટિઃ

(૨.૪.૩૪૮) વ્યાધિઃ કુષ્ટં પારિભાવ્યં વાપ્યં પાકલમુત્પલમ્

(૨.૪.૩૪૯) શઙ્ખિની ચોરપુષ્પી સ્યાત્કેશિન્યથ વિતુન્નકઃ

(૨.૪.૩૫૦) ઝટામલાજ્ઝટા તાલી શિવા તામલકીતિ ચ

(૨.૪.૩૫૧) પ્રપૌણ્ડરીકં પૌણ્ડર્યમથ તુન્નઃ કુબેરકઃ

(૨.૪.૩૫૨) કુણિઃ કચ્છઃ કાન્તલકો નન્દિવૃક્ષોઽથ રાક્ષસી

(૨.૪.૩૫૩) ચણ્ડા ધનહરી ક્ષેમદુષ્પત્રગણહાસકાઃ

(૨.૪.૩૫૪) વ્યાડાયુધં વ્યાઘ્રનખં કરજં ચક્રકારકમ્

(૨.૪.૩૫૫) સુષિરા વિદ્રુમલતા કપોતાઙ્ઘ્રિર્નટી નલી

(૨.૪.૩૫૬) ધમન્યઞ્જનકેશી ચ હનુર્હટ્ટવિલાસિની

(૨.૪.૩૫૭) શુક્તિઃ શઙ્ખઃ ખુરઃ કોલદલં નખમથાઢકી

(૨.૪.૩૫૮) કાક્ષી મૃત્સ્ના તુવરિકા મૃત્તાલકસુરાષ્ટ્રજે

(૨.૪.૩૫૯) કુટન્નટં દાશપુરં વાનેયં પરિપેલવમ્

(૨.૪.૩૬૦) પ્લવગોપુરગોનર્દકૈવર્તીમુસ્તકાનિ ચ

(૨.૪.૩૬૧) ગ્રન્થિપર્ણં શુકં બર્હં પુષ્પં સ્થૌણેયકુક્કુરે

(૨.૪.૩૬૨) મરુન્માલા તુ પિશુના સ્પૃક્કા દેવી લતા લઘુઃ

(૨.૪.૩૬૩) સમુદ્રાન્તા વધૂઃ કોટિવર્ષા લઙ્કોપિકેત્યપિ

(૨.૪.૩૬૪) તપસ્વિની જટામાંસી જટિલા લોમશામિષી

(૨.૪.૩૬૫) ત્વક્પત્રમુત્કટં ભૃઙ્ગં ત્વચં ચોચં વરાઙ્ગકમ્

(૨.૪.૩૬૬) કર્ચૂરકો દ્રાવિડકઃ કાલ્પકો વેધમુખ્યકઃ

(૨.૪.૩૬૭) ઓષધ્યો જાતિમાત્રે સ્યુરજાતૌ સર્વમૌષધમ્

(૨.૪.૩૬૮) શાકાખ્યં પત્રપુષ્પાદિ તણ્ડુલીયોડલ્પમારિષઃ

(૨.૪.૩૬૯) વિશલ્યાગ્નિશિખાનન્તા ફલિની શક્રપુષ્પિકા

(૨.૪.૩૭૦) સ્યાદ્દક્ષગન્ધા છગલાન્ત્ર્યાવેગી વૃદ્ધદારકઃ

(૨.૪.૩૭૧) જુઙ્ગો બ્રહ્મી તુ મત્સ્યાક્ષી વયઃસ્થા સોમવલ્લરી

(૨.૪.૩૭૨) પટુપર્ણી હૈમવતી સ્વર્ણક્ષીરી હિમાવતી

(૨.૪.૩૭૩) હયપુચ્છી તુ કામ્બોજી માષપર્ણી મહાસહા

(૨.૪.૩૭૪) તુણ્ડિકેરી રક્તફલા બિમ્બિકા પીલુપર્ણ્યપિ

(૨.૪.૩૭૫) બર્બરા કબરી તુઙ્ગી ખરપુષ્પાજગન્ધિકા

(૨.૪.૩૭૬) એલાપર્ણી તુ સુવહા રાસ્ના યુક્તરસા ચ સા

(૨.૪.૩૭૭) ચાઙ્ગેરી ચુક્રિકા દન્તશટામ્બષ્ઠામ્લલોણિકા

(૨.૪.૩૭૮) સહસ્રવેધી ચુક્રોડમ્લવેતસઃ શતવેધ્યપિ

(૨.૪.૩૭૯) નમસ્કારી ગણ્ડકારી સમઙ્ગા ખદિરેત્યપિ

(૨.૪.૩૮૦) જીવન્તી જીવની જીવા જીવનીયા મધુસ્રવા

(૨.૪.૩૮૧) કૂર્ચશીર્ષો મધુરકઃ શ‍ૃઙ્ગહ્રસ્વાઙ્ગજીવકાઃ

(૨.૪.૩૮૨) કિરાતતિક્તો ભૂનિમ્બોડનાર્યતિક્તોડથ સપ્તલા

(૨.૪.૩૮૩) વિમલા સાતલા ભૂરિફેના ચર્મકષેત્યપિ

(૨.૪.૩૮૪) વાયસોલી સ્વાદુરસા વયઃસ્થાથ મકૂલકઃ

(૨.૪.૩૮૫) નિકુમ્ભો દન્તિકા પ્રત્યક્શ્રેણ્યુદુમ્બરપર્ણ્યપિ

(૨.૪.૩૮૬) અજમોદા તૂગ્રગન્ધા બ્રહ્મદર્ભા યવાનિકા

(૨.૪.૩૮૭) મૂલે પુષ્કરકાશ્મીરપદ્મપત્રાણિ પૌષ્કરે

(૨.૪.૩૮૮) અવ્યથાતિચરા પદ્મા ચારટી પદ્મચારિણી

(૨.૪.૩૮૯) કામ્પિલ્યઃ કર્કશશ્ચન્દ્રો રક્તાઙ્ગો રોચનીત્યપિ

(૨.૪.૩૯૦) પ્રપુન્નાડસ્ત્વેડગજો દદ્રુઘ્નશ્ચકમર્દકઃ

(૨.૪.૩૯૧) પદ્માટ ઉરણાખ્યશ્ચ પલાણ્ડુસ્તુ સુકન્દકઃ

(૨.૪.૩૯૨) લતાર્કદુદ્રુમૌ તત્ર હરિતેડથ મહૌષધમ્

(૨.૪.૩૯૩)  લશુનં ગૃઞ્જનારિષ્ટમહાકન્દરસોનકાઃ
(૨.૪.૩૯૪)  પુનર્નવા તુ શોથઘ્ની વિતુન્નં સુનિષણ્ણકમ્
(૨.૪.૩૯૫)  સ્યાદ્વાતકઃ શીતલોઽપરાજિતા શણપર્ણ્યપિ
(૨.૪.૩૯૬)  પારાવતાઙ્ઘ્રિઃ કટભી પણ્યા જ્યોતિષ્મતી લતા
(૨.૪.૩૯૭)  વાર્ષિકં ત્રાયમાણા સ્યાત્ત્રાયન્તી બલભદ્રિકા
(૨.૪.૩૯૮)  વિષ્વક્સેનપ્રિયા ગૃષ્ટિર્વારાહી બદરેત્યપિ
(૨.૪.૩૯૯)  માર્કવો ભૃઙ્ગરાજઃ સ્યાત્કાકમાચી તુ વાયસી
(૨.૪.૪૦૦)  શતપુષ્પા સિતચ્છત્રાતિચ્છત્રા મધુરા મિસિઃ
(૨.૪.૪૦૧)  અવાક્પુષ્પી કારવી ચ સરણા તુ પ્રસારિણી
(૨.૪.૪૦૨)  તસ્યાં કટંભરા રાજબલા ભદ્રબલેત્યપિ
(૨.૪.૪૦૩)  જની જતૂકા રજની જતુકૃચ્ચક્રવર્તિની
(૨.૪.૪૦૪)  સંસ્પર્શાથ શટી ગન્ધમૂલી ષડ્ગ્રન્થિકેત્યપિ
(૨.૪.૪૦૫)  કર્ચૂરોઽપિ પલાશોઽથ કારવેલ્લઃ કઠિલ્લકઃ
(૨.૪.૪૦૬)  સુષવી ચાથ કુલકં પટોલસ્તિક્તકઃ પટુઃ
(૨.૪.૪૦૭)  કૂષ્માણ્ડકસ્તુ કર્કારુરુર્વારુઃ કર્કટી સ્ત્રિયૌ
(૨.૪.૪૦૮)  ઇક્ષ્વાકુઃ કટુતુમ્બી સ્યાત્તુમ્બ્યલાબૂરુભે સમે
(૨.૪.૪૦૯)  ચિત્રા ગવાક્ષી ગોડુમ્બા વિશાલા ત્વિન્દ્રવારુણી
(૨.૪.૪૧૦)  અર્શોઘ્નઃ સૂરણઃ કન્દો ગણ્ડીરસ્તુ સમષ્ઠિલા
(૨.૪.૪૧૧)  કલમ્બ્યુપોદિકા સ્ત્રી તુ મૂલકં હિલમોચિકા
(૨.૪.૪૧૨)  વાસ્તુકં શાકભેદાઃ સ્યુર્દૂર્વા તુ શતપર્વિકા
(૨.૪.૪૧૩)  સહસ્રવીર્યાભાર્ગવ્યૌ રુહાનન્તાથ સા સિતા
(૨.૪.૪૧૪)  ગોલોમી શતવીર્યા ચ ગણ્ડાલી શકુલાક્ષકા
(૨.૪.૪૧૫)  કુરુવિન્દો મેઘનામા મુસ્તા મુસ્તકમસ્ત્રિયામ્
(૨.૪.૪૧૬)  સ્યાદ્ભદ્રમુસ્તકો ગુન્દ્રા ચૂડાલા  ચક્રલોચ્ચટા
(૨.૪.૪૧૭)  વંશે ત્વક્સારકર્મારત્વાચિસારતૃણધ્વજાઃ
(૨.૪.૪૧૮)  શતપર્વા યવફલો વેણુમસ્કરતેજનાઃ   ૯૭૦
(૨.૪.૪૧૯)  વેણવઃ કીચકાસ્તે સ્યુર્યે સ્વનન્ત્યનિલોદ્ધતાઃ
(૨.૪.૪૨૦)  ગ્રન્થિર્ના પર્વપરુશી ગુન્દ્રસ્તેજનકઃ શરઃ
(૨.૪.૪૨૧)  નડસ્તુ ધમનઃ પોટકલોઽથો કાશમસ્ત્રિયામ્
(૨.૪.૪૨૨)  ઇક્ષુગન્ધા પોટગલઃ પુંસિ ભૂમ્નિ તુ બલ્વજાઃ
(૨.૪.૪૨૩)  રસાલ ઇક્ષુસ્તદ્ભેદાઃ પુણ્ડ્રકાન્તારકાદયઃ
(૨.૪.૪૨૪)  સ્યાદ્વીરણં વીરતરં મૂલેઽસ્યોશીરમસ્ત્રિયામ્

(૨.૪.૪૨૫) અભયં નલદં સેવ્યમમૃણાલં જલાશયમ્

(૨.૪.૪૨૬) લામજ્જકં લઘુલયમવદાહેષ્ટકાપથે

(૨.૪.૪૨૭) નડાદયસ્તૃણં ગર્મુચ્છ્યામાકપ્રમુખા અપિ

(૨.૪.૪૨૮) અસ્ત્રી કુશં કુથો દર્ભઃ પવિત્રમથ કત્તૃણમ્ ૯૮૦

(૨.૪.૪૨૯) પૌરસૌગન્ધિકધ્યામદેવેજગ્ધકરૌહિષમ્

(૨.૪.૪૩૦) છત્રાતિચ્છત્રપાલઘ્નૌ માલાતૃણકભૂસ્તૃણે

(૨.૪.૪૩૧) શષ્પં બાલતૃણમ્ ઘાસો યવસં તૃણમર્જુનમ્

(૨.૪.૪૩૨) તૃણાનાં સંહતિસ્તૃણ્યા નડ્યા તુ નડસંહતિઃ

(૨.૪.૪૩૩) તૃણરાજાહ્વયસ્તાલો નાલિકેરસ્તુ લાઙ્ગલી

(૨.૪.૪૩૪) ઘોણ્ટા તુ પૂગઃ ક્રમુકો ગુવાકઃ ખપુરોડસ્ય તુ

(૨.૪.૪૩૫) ફલમુદ્વેગમેતે ચ હિન્તાલસહિતાસ્ત્રયઃ

(૨.૪.૪૩૬) ખર્જૂરઃ કેતકી તાલી ખર્જુરી ચ તૃણદ્રુમાઃ  ઇતિ વનૌષધિવર્ગઃ

અથ સિંહાદિ વર્ગઃ

(૨.૪.૪૩૭) સિંહો મૃગેન્દ્રઃ પઞ્ચાસ્યો હર્યક્ષઃ કેસરી હરિઃ

(૨.૪.૪૩૮) કણ્ટીરવો મૃગારિપુર્મૃગદૃષ્ટિર્મૃગાશનઃ

(૨.૪.૪૩૯) પુણ્ડરીકઃ પઞ્ચનખચિત્રકાયમૃગદ્વિષઃ

(૨.૪.૪૪૦) શાર્દૂલદ્વીપિનૌ વ્યાઘ્રે તરક્ષુસ્તુ મૃગાદનઃ ૯૯૦

(૨.૪.૪૪૧) વરાહઃ સૂકરો ઘૃષ્ટિઃ કોલઃ પોત્રી કિરિઃ કિટિઃ

(૨.૪.૪૪૨) દંષ્ટ્રી ઘોણી સ્તબ્ધરોમા ક્રોડો ભૂદાર ઇત્યપિ

(૨.૪.૪૪૩) કપિપ્લવંગપ્લવગશાખામૃગવલીમુખાઃ

(૨.૪.૪૪૪) મર્કટો વાનરઃ કીશો વનૌકા અથ ભલ્લુકે

(૨.૪.૪૪૫) ઋક્ષાચ્છભલ્લભલ્લૂકા ગણ્ડકે ખડ્ગખડ્ગિનૌ

(૨.૪.૪૪૬) લુલાયો મહિષો વાહાદ્વિષત્કાસરસૈરિભાઃ

(૨.૪.૪૪૭) સ્ત્રિયાં શિવા ભૂરિમાયગોમાયુમૃગધૂર્તકાઃ

(૨.૪.૪૪૮) શ ૃગાલવઞ્ચકક્રોષ્ટુફેરુફેરવજમ્બુકાઃ

(૨.૪.૪૪૯) ઓતુર્બિડાલો માર્જારો વૃષદંશક આખુભુક્

(૨.૪.૪૫૦) ત્રયો ગૌધેરગૌધારગૌધેયા ગોધિકાત્મજે ૧૦૦૦

(૨.૪.૪૫૧) શ્વાવિત્તુ શલ્યસ્તલ્લોમ્નિ શલલી શલલં શલમ્

(૨.૪.૪૫૨) વાતપ્રમીર્વાતમૃગઃ કોકસ્ત્વીહામૃગો વૃકઃ

(૨.૪.૪૫૩) મૃગે કુરઙ્ગવાતાયુહરિણાજિનયોનયઃ

(૨.૪.૪૫૪) ઐણેયમેણ્યાશ્ચર્માદ્યમેણસ્યૈણમુભે ત્રિષુ

(૨.૪.૪૫૫) કદલી કન્દલી ચીનશ્ચમૂરુપ્રિયકાવપિ

(૨.૪.૪૫૬)  સમૂરુશ્ચેતિ હરિણા અમી અજિનયોનયઃ

(૨.૪.૪૫૭)  કૃષ્ણસારરુરુન્યઙ્કુરઙ્કુશમ્બરરૌહિષાઃ

(૨.૪.૪૫૮)  ગોકર્ણપૃષતૈણર્શ્યરોહિતાશ્ચમરો મૃગાઃ

(૨.૪.૪૫૯)  ગન્ધર્વઃ શરભો રામઃ સૃમરો ગવયઃ શશઃ

(૨.૪.૪૬૦)  ઇત્યાદયો મૃગેન્દ્રાદ્યા ગવાદ્યાઃ પશુજાતયઃ ૧૦૧૦

(૨.૪.૪૬૧)  અધોગન્તા તુ ખનકો વૃકઃ પુંધ્વજ ઉન્દુરઃ

(૨.૪.૪૬૨)  ઉન્દુરુર્મૂષકોઽપ્યાખુર્ગિરિકા બાલમૂષિકા

(૨.૪.૪૬૩)  ચુચુન્દરી ગન્ધમૂષી દીર્ઘદેહી તુ મૂષિકા

(૨.૪.૪૬૪)  સરટઃ કૃકલાસઃ સ્યાન્મુસલી ગૃહગોધિકા

(૨.૪.૪૬૫)  લૂતા સ્ત્રી તન્તુવાયોર્ણનાભમર્કટકાઃ સમાઃ

(૨.૪.૪૬૬)  નીલઙ્ગુસ્તુ કૃમિઃ કર્ણજલૌકાઃ શતપદ્યુભે

(૨.૪.૪૬૭)  વૃશ્ચિકઃ શૂકકીટઃ સ્યાદલિદ્રુણૌ તુ વૃશ્ચિકે

(૨.૪.૪૬૮)  પારાવતઃ કલરવઃ કપોતોઽથ શશાદનઃ

(૨.૪.૪૬૯)  પત્રી શ્યેન ઉલૂકસ્તુ વાયસારાતિપેચકૌ

(૨.૪.૪૭૦)  દિવાન્ધઃ કૌશિકો ઘૂકો દિવાભીતો નિશાટનઃ

(૨.૪.૪૭૧)  વ્યાઘ્રાટઃ સ્યાદ્ભરદ્વાજઃ ખઞ્જરીટસ્તુ ખઞ્જનઃ

(૨.૪.૪૭૨)  લોહપૃષ્ઠસ્તુ કઙ્કઃ સ્યાદથ ચાષઃ કિકીદિવિઃ

(૨.૪.૪૭૩)  કલિઙ્ગભૃઙ્ગધૂમ્યાટા અથ સ્યાચ્છતપત્રકઃ ૧૦૨૦

(૨.૪.૪૭૪)  દાર્વાઘાટોઽથ સારઙ્ગઃ સ્તોકકશ્ચાતકઃ સમાઃ

(૨.૪.૪૭૫)  કૃકવાકુસ્તામ્રચૂડઃ કુક્કુટશ્ચરણાયુધઃ

(૨.૪.૪૭૬)  ચટકઃ કલવિઙ્કઃ સ્યાત્તસ્ય સ્ત્રી ચટકા તયોઃ

(૨.૪.૪૭૭)  પુમપત્યે ચાટકૈરઃ સ્ત્ર્યપત્યે ચટકૈવ સા

(૨.૪.૪૭૮)  કર્કરેટુઃ કરેટુઃ સ્યાત્કૃકણક્રકરૌ સમૌ

(૨.૪.૪૭૯)  વનપ્રિયઃ પરભૃતઃ કોકિલઃ પિક ઇત્યપિ

(૨.૪.૪૮૦)  કાકે તુ કરટારિષ્ટબલિપુષ્ટસકૃત્પ્રજાઃ

(૨.૪.૪૮૧)  ધ્વાઙ્ક્ષાત્મઘોષપરભૃદ્બલિભુગ્વાયસા અપિ

(૨.૪.૪૮૨)  સ એવ ચ ચિરઞ્જીવી ચૈકદૃષ્ટિશ્ચ મૌકુલિઃ

(૨.૪.૪૮૩)  દ્રોણકાકસ્તુ કાકોલો દાત્યૂહઃ કાલકણ્ઠકઃ

(૨.૪.૪૮૪)  આતાપિચિલ્લૌ દાક્ષાય્યગૃધ્રૌ કીરશુકૌ સમૌ ૧૦૩૦

(૨.૪.૪૮૫)  ક્રુઙ્ક્રૌઞ્ચોઽથ બકઃ કહ્વઃ પુષ્કરાહ્વસ્તુ સારસઃ

(૨.૪.૪૮૬)  કોકશ્ચક્રશ્ચક્રવાકો રથાઙ્ગાહ્વયનામકઃ

(૨.૪.૪૮૭)  કાદમ્બઃ કલહંસઃ સ્યાદુત્ક્રોશકુરરૌ સમૌ

(૨.૪.૪૮૮) હંસાસ્તુ શ્વેતગરુતશ્ચક્રાઙ્ગા માનસૌકસઃ

(૨.૪.૪૮૯) રાજહંસાસ્તુ તે ચઞ્ચુચરણૈર્લોહિતૈઃ સિતાઃ

(૨.૪.૪૯૦) મલિનૈર્મલ્લિકાક્ષાસ્તે ધાર્તરાષ્ટ્રાઃ સિતેતરૈઃ

(૨.૪.૪૯૧) શરારિરાટિરાડિશ્ચ બલાકા બિસકણ્ઠિકા

(૨.૪.૪૯૨) હંસસ્ય યોષિદ્વરટા સારસસ્ય તુ લક્ષ્મણા

(૨.૪.૪૯૩) જતુકાજિનપત્રા સ્યાત્પરોષ્ણી તૈલપાયિકા

(૨.૪.૪૯૪) વર્વણા મક્ષિકા નીલા સરઘા મધુમક્ષિકા ૧૦૪૦

(૨.૪.૪૯૫) પતઙ્ગિકા પુત્તિકા સ્યાદ્દંશસ્તુ વનમક્ષિકા

(૨.૪.૪૯૬) દંશી તજ્જાતિરલ્પા સ્યાદ્ગન્ધોલી વરટા દ્વયોઃ

(૨.૪.૪૯૭) ભૃઙ્ગારી ઝીરુકા ચીરી ઝિલ્લિકા ચ સમા ઇમાઃ

(૨.૪.૪૯૮) સમૌ પતઙ્ગશલભૌ ખદ્યોતો જ્યોતિરિઙ્ગણઃ

(૨.૪.૪૯૯) મધુવ્રતો મધુકરો મધુલિણ્મધુપાલિનઃ

(૨.૪.૫૦૦) દ્વિરેફપુષ્પલિડ્ ભૃઙ્ગ ષટ્પદ ભ્રમરાલયઃ

(૨.૪.૫૦૧) મયૂરો બર્હિણો બર્હી નીલકણ્ઠો ભુજંગભુક્

(૨.૪.૫૦૨) શિખાવલઃ શિખી કેકી મેઘનાદાનુલાસ્યપિ

(૨.૪.૫૦૩) કેકા વાણી મયૂરસ્ય સમૌ ચન્દ્રકમેચકૌ

(૨.૪.૫૦૪) શિખા ચૂડા શિખણ્ડસ્તુ પિચ્છબર્હે નપુંસકે

(૨.૪.૫૦૫) ખગે વિહઙ્ગવિહગવિહઙ્ગમવિહાયસઃ

(૨.૪.૫૦૬) શકુન્તિપક્ષિશકુનિશકુન્તશકુનદ્વિજાઃ

(૨.૪.૫૦૭) પતત્રિપત્રિપતગપતત્પત્રરથાણ્ડજાઃ

(૨.૪.૫૦૮) નગૌકોવાજિવિકિરવિવિષ્કિરપતત્રયઃ

(૨.૪.૫૦૯) નીડોદ્ભવાઃ ગરુત્મન્તઃ પિત્સન્તો નભસંગમાઃ

(૨.૪.૫૧૦) તેષાં વિશેષા હારીતો મદ્ગુઃ કારણ્ડવઃ પ્લવઃ

(૨.૪.૫૧૧) તિત્તિરિઃ કુક્કુભો લાવો જીવઞ્જીવશ્ચ કોરકઃ

(૨.૪.૫૧૨) કોયષ્ટિકષ્ ટિટ્ટિભકો વર્તકો વર્તિકાદયઃ

(૨.૪.૫૧૩) ગરુત્પક્ષચ્છદાઃ પત્રં પતત્રં ચ તનૂરુહમ્

(૨.૪.૫૧૪) સ્ત્રી પક્ષતિઃ પક્ષમૂલં ચઞ્ચુસ્ત્રોટિરુભે સ્ત્રિયૌ

(૨.૪.૫૧૫) પ્રડીનોડ્ડીનસઁડીનાન્યેતાઃ ખગગતિક્રિયાઃ

(૨.૪.૫૧૬) પેશી કોશો દ્વિહીનેડણ્ડં કુલાયો નીડમસ્ત્રિયામ્

(૨.૪.૫૧૭) પોતઃ પાકોડર્ભકો ડિમ્ભઃ પૃથુકઃ શાવકઃ શિશુઃ

(૨.૪.૫૧૮) સ્ત્રીપુંસૌ મિથુનં દ્વન્દ્વં યુગ્મં તુ યુગુલં યુગમ્

(૨.૪.૫૧૯) સમૂહે નિવહવ્યૂહસંદોહવિસરવ્રજાઃ

(૨.૪.૫૨૦) સ્તોમૌઘનિકરવ્રાતવારસંઘાતસંચયાઃ

(૨.૪.૫૨૧) સમુદાયઃ સમુદયઃ સમવાયશ્ચ યો ગણઃ

(૨.૪.૫૨૨) સ્ત્રિયાં તુ સંહતિર્વૃન્દં નિકુરમ્બં કદમ્બકમ્

(૨.૪.૫૨૩) વૃન્દભેદાઃ સમૈર્વર્ગઃ સંઘસાર્થૌ તુ જન્તુભિઃ

(૨.૪.૫૨૪) સજાતીયૈઃ કુલં યૂથં તિરશ્ચાં પુંનપુંસકમ્

(૨.૪.૫૨૫) પશૂનાં સમજોઽન્યેષાં સમાજોઽથ સધર્મિણામ્

(૨.૪.૫૨૬) સ્યાન્નિકાયઃ પુઞ્જરાશી તૂત્કરઃ કૂટમસ્ત્રિયામ્

(૨.૪.૫૨૭) કાપોતશૌકમાયૂરતૈત્તિરાદીનિ તદ્ગણે

(૨.૪.૫૨૮) ગૃહાસક્તાઃ પક્ષિમૃગાશ્છેકાસ્તે ગૃહ્યકાશ્ચ તે । ઇતિ સિંહાદિવર્ગઃ

(૨.૫.૫૨૯) મનુષ્યા માનુષા મર્ત્યા મનુજા માનવા નરાઃ । અથ મનુષ્યવર્ગઃ

(૨.૫.૫૩૦) સ્યુઃ પુમાંસઃ પઞ્ચજનાઃ પુરુષાઃ પૂરુષા નરઃ

(૨.૫.૫૩૧) સ્ત્રી યોષિદબલા યોષા નારી સીમન્તિની વધૂઃ

(૨.૫.૫૩૨) પ્રતીપદર્શિની વામા વનિતા મહિલા તથા

(૨.૫.૫૩૩) વિશેષાસ્ત્વઙ્ગના ભીરુઃ કામિની વામલોચના

(૨.૫.૫૩૪) પ્રમદા માનિની કાન્તા લલના ચ નિતમ્બિની

(૨.૫.૫૩૫) સુન્દરી રમણી રામા કોપના સૈવ ભામિની

(૨.૫.૫૩૬) વરારોહા મત્તકાશિન્યુત્તમા વરવર્ણિની

(૨.૫.૫૩૭) કૃતાભિષેકા મહિષી ભોગિન્યોઽન્યા નૃપસ્ત્રિયઃ

(૨.૫.૫૩૮) પત્ની પાણિગૃહીતી ચ દ્વિતીયા સહધર્મિણી

(૨.૫.૫૩૯) ભાર્યા જાયાથ પુંભૂમ્નિ દારાઃ સ્યાત્તુ કુટુમ્બિની

(૨.૫.૫૪૦) પુરંધ્રી સુચરિત્રા તુ સતી સાધ્વી પતિવ્રતા

(૨.૫.૫૪૧) કૃતસાપત્નિકાધ્યૂઢાધિવિન્નાથ સ્વયંવરા

(૨.૫.૫૪૨) પતિંવરા ચ વર્યાથ કુલસ્ત્રી કુલપાલિકા

(૨.૫.૫૪૩) કન્યા કુમારી ગૌરી તુ નગ્નિકાઽનાગતાર્તવા

(૨.૫.૫૪૪) સ્યાન્મધ્યમા દૃષ્ટરજાસ્તરુણી યુવતિઃ સમે

(૨.૫.૫૪૫) સમાઃ સ્નુષાજનીવધ્વશ્ચિરિણ્ટી તુ સુવાસિની

(૨.૫.૫૪૬) ઇચ્છાવતી કામુકા સ્યાદ્ વૃષસ્યન્તી તુ કામુકી

(૨.૫.૫૪૭) કાન્તાર્થિની તુ યા યાતિ સંકેતં સાભિસારિકા

(૨.૫.૫૪૮) પુંશ્ચલી ધર્ષિણી બન્ધક્યસતી કુલટેત્વરી

(૨.૫.૫૪૯) સ્વૈરિણી પાંસુલા ચ સ્યાદશિશ્વી શિશુના વિના

(૨.૫.૫૫૦) અવીરા નિષ્પતિસુતા વિશ્વસ્તાવિધવે સમે

(૨.૫.૫૫૧) આલિઃ સખી વયસ્યાથ પતિવત્ની સભર્તૃકા

(૨.૫.૫૫૨) વૃદ્ધા પલિક્ની પ્રાજ્ઞી તુ પ્રજ્ઞા પ્રાજ્ઞા તુ ધીમતી

(૨.૫.૫૫૩) શૂદ્રી શૂદ્રસ્ય ભાર્યા સ્યાચ્છૂદ્રા તજ્જાતિરેવ ચ

(૨.૫.૫૫૪) આભીરી તુ મહાશૂદ્રી જાતિપુંયોગયોઃ સમા

(૨.૫.૫૫૫) અર્યાણી સ્વયમર્યા સ્યાત્ક્ષત્રિયા ક્ષત્રિયાણ્યપિ

(૨.૫.૫૫૬) ઉપાધ્યાયાપ્યુપાધ્યાયી સ્યાદાચાર્યાપિ ચ સ્વતઃ

(૨.૫.૫૫૭) આચાર્યાની તુ પુંયોગે સ્યાદર્યી ક્ષત્રિયી તથા

(૨.૫.૫૫૮) ઉપાધ્યાયાન્યુપાધ્યાયી પોટા સ્ત્રીપુંસલક્ષણા

(૨.૫.૫૫૯) વીરપત્ની વીરભાર્યા વીરમાતા તુ વીરસૂઃ

(૨.૫.૫૬૦) જાતાપત્યા પ્રજાતા ચ પ્રસૂતા ચ પ્રસૂતિકા

(૨.૫.૫૬૧) સ્ત્રી નગ્નિકા કોટવી સ્યાદ્દૂતીસંચારિકે સમે

(૨.૫.૫૬૨) કાત્યાયન્યર્ધવૃદ્ધા યા કાષાયવસનાઽધવા

(૨.૫.૫૬૩) સૈરન્ધ્રી પરવેશ્મસ્થા સ્વવશા શિલ્પકારિકા

(૨.૫.૫૬૪) અસિક્ની સ્યાદવૃદ્ધા યા પ્રેષ્યાઽન્તઃપુરચારિણી

(૨.૫.૫૬૫) વારસ્ત્રી ગણિકા વેશ્યા રૂપાજીવાથ સા જનૈઃ

(૨.૫.૫૬૬) સત્કૃતા વારમુખ્યા સ્યાત્કુટ્ટની શમ્ભલી સમે

(૨.૫.૫૬૭) વિપ્રશ્નિકા ત્વીક્ષણિકા દૈવજ્ઞાથ રજસ્વલા

(૨.૫.૫૬૮) સ્ત્રીધર્મિણ્યવિરાત્રેયી મલિની પુષ્પવત્યપિ

(૨.૫.૫૬૯) ઋતુમત્યપ્યુદક્યાપિ સ્યાદ્રજઃ પુષ્પમાર્તવમ્

(૨.૫.૫૭૦) શ્રદ્ધાલુર્દોહદવતી નિષ્કલા વિગતાર્તવા

(૨.૫.૫૭૧) આપન્નસત્ત્વા સ્યાદ્ગુર્વિણ્યન્તર્વત્ની ચ ગર્ભિણી

(૨.૫.૫૭૨) ગણિકાદેસ્તુ ગાણિક્યં ગાર્ભિણં યૌવતં ગણે

(૨.૫.૫૭૩) પુનર્ભૂર્દિધિષૂરૂઢા દ્વિસ્તસ્યા દિધિષુઃ પતિઃ

(૨.૫.૫૭૪) સ તુ દ્વિજોઽગ્રેદિધિષૂઃ સૈવ યસ્ય કુટુમ્બિની

(૨.૫.૫૭૫) કાનીનઃ કન્યકાજાતઃ સુતોઽથ સુભગાસુતઃ

(૨.૫.૫૭૬) સૌભાગિનેયઃ સ્યાત્પારસ્ત્રૈણેયસ્તુ પરસ્ત્રિયાઃ

(૨.૫.૫૭૭) પૈતૃષ્વસેયઃ સ્યાત્પૈતૃષ્વસ્રીયશ્ચ પિતૃષ્વસુઃ

(૨.૫.૫૭૮) સુતો માતૃષ્વસુશ્ચૈવં વૈમાત્રેયો વિમાતૃજઃ

(૨.૫.૫૭૯) અથ બાન્ધકિનેયઃ સ્યાદ્બન્ધુલશ્ચાસતીસુતઃ

(૨.૫.૫૮૦) કૌલટેરઃ કૌલતેયો ભિક્ષુકી તુ સતી યદિ

(૨.૫.૫૮૧) તદા કૌલટિનેયોઽસ્યાઃ કૌલતેયોઽપિ ચાત્મજઃ

(૨.૫.૫૮૨) આત્મજસ્તનયઃ સૂનુઃ સુતઃ પુત્રઃ સ્ત્રિયાં ત્વમી

(૨.૫.૫૮૩) આહુર્દુહિતરં સર્વેઽપત્યં તોકં તયોઃ સમે

(૨.૫.૫૮૪) સ્વજાતે ત્વૌરસોરસ્યૌ તાતસ્તુ જનકઃ પિતા
(૨.૫.૫૮૫) જનયિત્રી પ્રસૂર્માતા જનની ભગિની સ્વસા
(૨.૫.૫૮૬) નનાન્દા તુ સ્વસા પત્યુર્નપ્ત્રી પૌત્રી સુતાત્મજા
(૨.૫.૫૮૭) ભાર્યાસ્તુ ભ્રાતૃવર્ગસ્ય યાતરઃ સ્યુઃ પરસ્પરમ્
(૨.૫.૫૮૮) પ્રજાવતી ભ્રાતૃજાયા માતુલાની તુ માતુલી
(૨.૫.૫૮૯) પતિપત્ન્યોઃ પ્રસૂઃ શ્વશ્રૂઃ શ્વશુરસ્તુ પિતા તયોઃ
(૨.૫.૫૯૦) પિતુર્ભ્રાતા પિતૃવ્યઃ સ્યાન્માતુર્ભ્રાતા તુ માતુલઃ
(૨.૫.૫૯૧) શ્યાલાઃ સ્યુર્ભ્રાતરઃ પત્ન્યાઃ સ્વામિનો દેવૃદેવરૌ
(૨.૫.૫૯૨) સ્વસ્રીયો ભાગિનેયઃ સ્યાજ્જમાતા દુહિતુઃ પતિઃ
(૨.૫.૫૯૩) પિતામહઃ પિતૃપિતા તત્પિતા પ્રપિતામહઃ
(૨.૫.૫૯૪) માતુર્માતામહાદ્યેવં સપિણ્ડાસ્તુ સનાભયઃ
(૨.૫.૫૯૫) સમાનોદર્યસોદર્યસગર્ભ્યસહજાઃ સમાઃ
(૨.૫.૫૯૬) સગોત્રબાન્ધવજ્ઞાતિબન્ધુસ્વસ્વજનાઃ સમાઃ
(૨.૫.૫૯૭) જ્ઞાતેયં બન્ધુતા તેષાં ક્રમાદ્ભાવસમૂહયોઃ
(૨.૫.૫૯૮) ધવઃ પ્રિયઃ પતિર્ભર્તા જારસ્તૂપપતિઃ સમૌ
(૨.૫.૫૯૯) અમૃતે જારજઃ કુણ્ડો મૃતે ભર્તરિ ગોલકઃ
(૨.૫.૬૦૦) ભ્રાત્રીયો ભ્રાતૃજો ભ્રાતૃભગિન્યૌ ભ્રાતરાવુભૌ
(૨.૫.૬૦૧) માતાપિતરૌ પિતરૌ માતરપિતરૌ પ્રસૂજનયિતારૌ
(૨.૫.૬૦૨) શ્વશ્રૂશ્વશુરૌ શ્વશુરૌ પુત્રૌ પુત્રશ્ચ દુહિતા ચ
(૨.૫.૬૦૩) દંપતી જંપતી જાયાપતી ભાર્યાપતી ચ તૌ
(૨.૫.૬૦૪) ગર્ભાશયો જરાયુઃ સ્યાદુલ્બં ચ કલલોઽસ્ત્રિયામ્
(૨.૫.૬૦૫) સૂતિમાસો વૈજનનો ગર્ભો ભ્રૂણ ઇમૌ સમૌ
(૨.૫.૬૦૬) તૃતીયાપ્રકૃતિઃ શણ્ઢઃ ક્લીબઃ પણ્ડો નપુંસકે
(૨.૫.૬૦૭) શિશુત્વં શૈશવં બાલ્યં તારુણ્યં યૌવનં સમે
(૨.૫.૬૦૮) સ્યાત્સ્થાવિરં તુ વૃદ્ધત્વં વૃદ્ધસંઘેઽપિ વાર્ધકમ્
(૨.૫.૬૦૯) પલિતં જરસા શૌક્લ્યં કેશાદૌ વિસ્રસા જરા
(૨.૫.૬૧૦) સ્યાદુત્તાનશયા ડિમ્ભા સ્તનપા ચ સ્તનંધયી
(૨.૫.૬૧૧) બાલસ્તુ સ્યાન્માણવકો વયસ્થસ્તરુણો યુવા
(૨.૫.૬૧૨) પ્રવયાઃ સ્થવિરો વૃદ્ધો જીનો જીર્ણો જરન્નપિ
(૨.૫.૬૧૩) વર્ષીયાન્દશમી જ્યાયાન્પૂર્વજસ્ત્વગ્રિયોઽગ્રજઃ
(૨.૫.૬૧૪) જઘન્યજે સ્યુઃ કનિષ્ઠયવીયોઽવરજાનુજાઃ
(૨.૫.૬૧૫) અમાંસો દુર્બલશ્છાતો બલવાન્માંસલોંઽસલઃ

(૨.૫.૬૧૬) તુન્દિલસ્તુન્દિભસ્તુન્દી બૃહત્કુક્ષિઃ પિચણ્ડિલઃ

(૨.૫.૬૧૭) અવટીટોઽવનાટશ્ચાવભ્રટો નતનાસિકે

(૨.૫.૬૧૮) કેશવઃ કેશિકઃ કેશી વલિનો વલિભઃ સમૌ

(૨.૫.૬૧૯) વિકલાઙ્ગસ્ત્વપોગણ્ડઃ ખર્વો હ્રસ્વશ્ચ વામનઃ

(૨.૫.૬૨૦) ખરણાઃ સ્યાત્ખરણસો વિગ્રસ્તુ ગતનાસિકઃ

(૨.૫.૬૨૧) ખુરણાઃ સ્યાત્ખુરણસઃ પ્રજ્ઞુઃ પ્રગતજાનુકઃ

(૨.૫.૬૨૨) ઊર્ધ્વજ્ઞુરૂર્ધ્વજાનુઃ સ્યાત્સંજ્ઞુઃ સંહતજાનુકઃ

(૨.૫.૬૨૩) સ્યાદેડે બધિરઃ કુબ્જે ગડુલઃ કુકરે કુણિઃ

(૨.૫.૬૨૪) પૃશ્નિરલ્પતનૌ શ્રોણઃ પઙ્ગૌ મુણ્ડસ્તુ મુણ્ડિતે

(૨.૫.૬૨૫) વલિરઃ કેકરે ખોડે ખઞ્જસ્ત્રિષુ જરાવરાઃ

(૨.૫.૬૨૬) જડુલઃ કાલકઃ પિપ્લુસ્તિલકસ્તિલકાલકઃ

(૨.૫.૬૨૭) અનામયં સ્યાદારોગ્યં ચિકિત્સા રુક્પ્રતિક્રિયા

(૨.૫.૬૨૮) ભેષજૌષધભૈષજ્યાન્યગદો જાયુરિત્યપિ

(૨.૫.૬૨૯) સ્ત્રી રુગ્રુજા ચોપતાપરોગવ્યાધિગદામયાઃ

(૨.૫.૬૩૦) ક્ષયઃ શોષશ્ચ યક્ષ્મા ચ પ્રતિશ્યાયસ્તુ પીનસઃ

(૨.૫.૬૩૧) સ્ત્રી ક્ષુત્ક્ષુતં ક્ષવઃ પુંસિ કાસસ્તુ ક્ષવથુઃ પુમાન્

(૨.૫.૬૩૨) શોફસ્તુ શ્વયથુઃ શોથઃ પાદસ્ફોટો વિપાદિકા

(૨.૫.૬૩૩) કિલાસસિધ્મે કચ્છ્વાં તુ પામ પામા વિચર્ચિકા

(૨.૫.૬૩૪) કણ્ડૂઃ ખર્જૂશ્ચ કણ્ડૂયા વિસ્ફોટઃ પિટકઃ સ્ત્રિયામ્

(૨.૫.૬૩૫) વ્રણોઽસ્ત્રિયામીર્મમરુઃ ક્લીબે નાડીવ્રણઃ પુમાન્

(૨.૫.૬૩૬) કોઠો મણ્ડલકં કુશ્ઠશ્વિત્રે દુર્નામકાર્શસી

(૨.૫.૬૩૭) આનાહસ્તુ નિબન્ધઃ સ્યાદ્ગ્રહણીરુક્પ્રવાહિકા

(૨.૫.૬૩૮) પ્રચ્છર્દિકા વમિશ્ચ સ્ત્રી પુમાંસ્તુ વમથુઃ સમાઃ

(૨.૫.૬૩૯) વ્યાધિભેદા વિદ્રધિઃ સ્ત્રી જ્વરમેહભગંદરાઃ

(૨.૫.૬૪૦) શ્લીપદં પાદવલ્મીકં કેશઘ્નસ્ત્વિન્દ્રલુપ્તકઃ

(૨.૫.૬૪૧) અશ્મરી મૂત્રકૃચ્છ્રમ્ સ્યાત્પૂર્વે શુક્રાવધેસ્ત્રિષુ

(૨.૫.૬૪૨) રોગહાર્યગદંકારો ભિષગ્વૈદ્યૌ ચિકિત્સકે

(૨.૫.૬૪૩) વાર્તો નિરામયઃ કલ્ય ઉલ્લાઘો નિર્ગતો ગદાત્

(૨.૫.૬૪૪) ગ્લાનગ્લાસ્નૂ આમયાવી વિકૃતો વ્યાધિતોઽપટુઃ

(૨.૫.૬૪૫) આતુરોઽભ્યમિતોઽભ્યાન્તઃ સમૌ પામનકચ્છુરૌ

(૨.૫.૬૪૬) દદ્રુણો દદ્રુરોગી સ્યાદર્શોરોગયુતોઽર્શસઃ

(૨.૫.૬૪૭) વાતકી વાતરોગી સ્યાત્સાતિસારોઽતિસારકી

(૨.૫.૬૪૮) સ્યુઃ ક્લિન્નાક્ષે ચુલ્લચિલ્લપિલ્લાઃ ક્લિન્નેઽક્ષ્ણિ ચાપ્યમી
(૨.૫.૬૪૯) ઉન્મત્ત ઉન્માદવતિ શ્લેષ્મલઃ શ્લેષ્મણઃ કફી
(૨.૫.૬૫૦) ન્યુબ્જો ભુગ્ને રુજા વૃદ્ધનાભૌ તુન્દિલતુન્દિભૌ
(૨.૫.૬૫૧) વિલાસી સિધ્મલોઽન્ધોઽદૃઙ્મૂર્ચ્છાલે મૂર્તમૂર્ચ્છિતૌ
(૨.૫.૬૫૨) શુક્રં તેજોરેતસી ચ બીજવીર્યેન્દ્રિયાણિ ચ
(૨.૫.૬૫૩) માયુઃ પિત્તં કફઃ શ્લેષ્મા સ્ત્રિયાં તુ ત્વગસૃગ્ધરા
(૨.૫.૬૫૪) પિશિતં તરસં માંસં પલલં ક્રવ્યમામિષમ્
(૨.૫.૬૫૫) ઉત્તપ્તં શુષ્કમાંસં સ્યાત્તદ્વલ્લૂરં ત્રિલિઙ્ગકમ્
(૨.૫.૬૫૬) રુધિરેઽસૃગ્લોહિતાસ્રરક્તક્ષતજશોણિતમ્
(૨.૫.૬૫૭) બુક્કાગ્રમાંસં હૃદયં હૃન્મેદસ્તુ વપા વસા
(૨.૫.૬૫૮) પશ્ચાદ્ગ્રીવાશિરા મન્યા નાડી તુ ધમનિઃ શિરા
(૨.૫.૬૫૯) તિલકં ક્લોમ મસ્તિષ્કં ગોર્દં કિટ્ટં મલોઽસ્ત્રિયામ્
(૨.૫.૬૬૦) અન્ત્રં પુરીતગુલ્મસ્તુ પ્લીહા પુંસ્યથ વસ્નસા
(૨.૫.૬૬૧) સ્નાયુઃ સ્ત્રિયાં કાલખણ્ડયકૃતી તુ સમે ઇમે
(૨.૫.૬૬૨) સૃણિકા સ્યન્દની લાલા દૂષિકા નેત્રયોર્મલમ્
(૨.૫.૬૬૩) નાસામલં તુ સિંઘાણં પિઞ્જૂષં કર્ણયોર્મલમ્
(૨.૫.૬૬૪) મૂત્રં પ્રસ્રાવ ઉચ્ચારાવસ્કરૌ શમલં શકૃત્
(૨.૫.૬૬૫) પુરીષં ગૂથવર્ચસ્કમસ્ત્રી વિષ્ઠાવિશૌ સ્ત્રિયૌ
(૨.૫.૬૬૬) સ્યાત્કર્પરઃ કપાલોઽસ્ત્રી કીકસં કુલ્યમસ્થિ ચ
(૨.૫.૬૬૭) સ્યાચ્છરીરાસ્થ્નિ કંકાલઃ પૃષ્ઠાસ્થ્નિ તુ કશેરુકા
(૨.૫.૬૬૮) શિરોસ્થનિ કરોટિઃ સ્ત્રી પાર્શ્વાસ્થનિ તુ પર્શુકા
(૨.૫.૬૬૯) અઙ્ગં પ્રતીકોઽવયવોઽપઘનોઽથ કલેવરમ્
(૨.૫.૬૭૦) ગાત્રં વપુઃ સંહનનં શરીરં વર્ષ્મ વિગ્રહઃ
(૨.૫.૬૭૧) કાયો દેહઃ ક્લીબપુંસોઃ સ્ત્રિયાં મૂર્તિસ્તનુસ્તનૂઃ
(૨.૫.૬૭૨) પાદાગ્રં પ્રપદં પાદઃ પદઙ્ઘ્રિશ્ચરણોઽસ્ત્રિયામ્
(૨.૫.૬૭૩) તદ્ ગ્રન્થી ઘુટિકે ગુલ્ફૌ પુમાન્પાર્ષ્ણિસ્તયોરધઃ
(૨.૫.૬૭૪) જઙ્ઘા તુ પ્રસૃતા જાનૂરુપર્વાષ્ઠીવદસ્ત્રિયામ્
(૨.૫.૬૭૫) સક્થિ ક્લીબે પુમાનૂરુસ્તત્સંધિઃ પુંસિ વઙ્ક્ષણઃ
(૨.૫.૬૭૬) ગુદં ત્વપાનં પાયુર્ના બસ્તિર્નાભેરધો દ્વયોઃ
(૨.૫.૬૭૭) કટો ના શ્રોણિફલકં કટિઃ શ્રોણિઃ કકુદ્મતી
(૨.૫.૬૭૮) પશ્ચાન્નિતમ્બઃ સ્ત્રીકટ્યાઃ ક્લીબે તુ જઘનં પુરઃ
(૨.૫.૬૭૯) કૂપકૌ તુ નિતમ્બસ્થૌ દ્વયહીને કકુન્દરે

(૨.૫.૬૮૦) સ્ત્રિયામ્ સ્ફિચૌ કટિપ્રોથાવુપસ્થો વક્ષ્યમાણયોઃ

(૨.૫.૬૮૧) ભગં યોનિર્દ્વયોઃ શિશ્નો મેઢ્રો મેહનશેફસી

(૨.૫.૬૮૨) મુષ્કોઽણ્ડકોશો વૃષણઃ પૃષ્ઠવંશાધરે ત્રિકમ્

(૨.૫.૬૮૩) પિચણ્ડકુક્ષી જઠરોદરં તુન્દં સ્તનૌ કુચૌ

(૨.૫.૬૮૪) ચૂચુકં તુ કુચાગ્રં સ્યાન્ન ના ક્રોડં ભુજાન્તરમ્

(૨.૫.૬૮૫) ઉરો વત્સં ચ વક્ષશ્ચ પૃષ્ઠં તુ ચરમં તનોઃ

(૨.૫.૬૮૬) સ્કન્ધો ભુજશિરોંસોઽસ્ત્રી સંધી તસ્યૈવ જત્રુણી

(૨.૫.૬૮૭) બાહુમૂલે ઉભે કક્ષૌ પાર્શ્વમસ્ત્રી તયોરધઃ

(૨.૫.૬૮૮) મધ્યમં ચાવલગ્નં ચ મધ્યોઽસ્ત્રી દ્વૌ પરૌ દ્વયોઃ

(૨.૫.૬૮૯) ભુજબાહૂ પ્રવેષ્ટો દોઃ સ્યાત્કફોણિસ્તુ કૂર્પરઃ

(૨.૫.૬૯૦) અસ્યોપરિ પ્રગણ્ડઃ સ્યાત્પ્રકોષ્ઠસ્તસ્ય ચાપ્યધઃ

(૨.૫.૬૯૧) મણીબન્ધાદાકનિષ્ઠં કરસ્ય કરભો બહિઃ

(૨.૫.૬૯૨) પઞ્ચશાખઃ શયઃ પાણિસ્તર્જની સ્યાત્પ્રદેશિની

(૨.૫.૬૯૩) અઙ્ગુલ્યઃ કરશાખાઃ સ્યુઃ પુંસ્યઙ્ગુષ્ઠઃ પ્રદેશિની

(૨.૫.૬૯૪) મધ્યમાઽનામિકા ચાપિ કનિષ્ઠા ચેતિ તાઃ ક્રમાત્

(૨.૫.૬૯૫) પુનર્ભવઃ કરરુહો નખોઽસ્ત્રી નખરોઽસ્ત્રિયામ્

(૨.૫.૬૯૬) પ્રાદેશતાલગોકર્ણાસ્તર્જન્યાદિયુતે તતે

(૨.૫.૬૯૭) અઙ્ગુષ્ઠે સકનિષ્ઠે સ્યાદ્વિતસ્તિર્દ્વાદશાઙ્ગુલઃ

(૨.૫.૬૯૮) પાણૌ ચપેટપ્રતલપ્રહસ્તા વિસ્તૃતાઙ્ગુલૌ

(૨.૫.૬૯૯) દ્વૌ સંહતૌ સંહતતલપ્રતલૌ વામદક્ષિણૌ

(૨.૫.૭૦૦) પાણિર્નિકુબ્જઃ પ્રસૃતિસ્તૌ યુતાવઞ્જલિઃ પુમાન્

(૨.૫.૭૦૧) પ્રકોષ્ઠે વિસ્તૃતકરે હસ્તો મુષ્ટ્યા તુ બદ્ધયા

(૨.૫.૭૦૨) સ રત્નિઃ સ્યાદરત્નિસ્તુ નિષ્કનિષ્ઠેન મુષ્ટિના

(૨.૫.૭૦૩) વ્યામો બાહ્વોઃ સકરયોસ્તતયોસ્તિર્યગનન્તરમ્

(૨.૫.૭૦૪) ઊર્ધ્વવિસ્તૃતદોઃ પાણિનૃમાને પૌરુષં ત્રિષુ

(૨.૫.૭૦૫) કણ્ઠો ગલોઽથ ગ્રીવાયાં શિરોધિઃ કન્ધરેત્યપિ

(૨.૫.૭૦૬) કમ્બુગ્રીવા ત્રિરેખા સાઽવટુર્ઘાટા કૃકાટિકા

(૨.૫.૭૦૭) વક્ત્રાસ્યે વદનં તુણ્ડમાનનં લપનં મુખમ્

(૨.૫.૭૦૮) ક્લીબે ઘ્રાણં ગન્ધવહા ઘોણા નાસા ચ નાસિકા

(૨.૫.૭૦૯) ઓષ્ઠાધરૌ તુ રદનચ્છદૌ દશનવાસસી

(૨.૫.૭૧૦) અધસ્તાચ્ચિબુકં ગણ્ડૌ કપોલૌ તત્પરા હનુઃ

(૨.૫.૭૧૧) રદના દશના દન્તા રદાસ્તાલુ તુ કાકુદમ્

(૨.૫.૭૧૨) રસજ્ઞા રસના જિહ્વા પ્રાન્તાવોષ્ઠસ્ય સૃક્કિણી
(૨.૫.૭૧૩) લલાટમલિકં ગોધિરૂર્ધ્વે દૃગ્ભ્યાં ભ્રુવૌ સ્ત્રિયૌ
(૨.૫.૭૧૪) કૂર્ચમસ્ત્રી ભ્રુવોર્મધ્યં તારકાક્ષ્ણઃ કનીનિકા
(૨.૫.૭૧૫) લોચનં નયનં નેત્રમીક્ષણં ચક્ષુરક્ષિણી
(૨.૫.૭૧૬) દૃગ્દૃષ્ટી ચાસ્રુ નેત્રામ્બુ રોદનં ચાસ્રમશ્રુ ચ
(૨.૫.૭૧૭) અપાઙ્ગૌ નેત્રયોરન્તૌ કટાક્ષોઽપાઙ્ગદર્શને
(૨.૫.૭૧૮) કર્ણશબ્દગ્રહૌ શ્રોત્રં શ્રુતિઃ સ્ત્રી શ્રવણં શ્રવઃ
(૨.૫.૭૧૯) ઉત્તમાઙ્ગં શિરઃ શીર્ષં મૂર્ધા ના મસ્તકોઽસ્ત્રિયામ્
(૨.૫.૭૨૦) ચિકુરઃ કુન્તલો વાલઃ કચઃ કેશઃ શિરોરુહઃ
(૨.૫.૭૨૧) તદ્વૃન્દે કૈશિકં કૈશ્યમલકાશ્ચૂર્ણકુન્તલાઃ
(૨.૫.૭૨૨) તે લલાટે ભ્રમરકાઃ કાકપક્ષઃ શિખણ્ડકઃ
(૨.૫.૭૨૩) કબરી કેશવેશોઽથ ધમ્મિલ્લઃ સંયતાઃ કચાઃ
(૨.૫.૭૨૪) શિખા ચૂડા કેશપાશી વ્રતિનસ્તુ સટા જટા
(૨.૫.૭૨૫) વેણી પ્રવેણી શીર્ષણ્યશિરસ્યૌ વિશદે કચે
(૨.૫.૭૨૬) પાશઃ પક્ષશ્ચ હસ્તશ્ચ કલાપાર્થાઃ કચાત્પરે
(૨.૫.૭૨૭) તનૂરુહં રોમ લોમ તદ્વૃદ્ધૌ શ્મશ્રુ પુમ્મુખે
(૨.૫.૭૨૮) આકલ્પવેષૌ નેપથ્યં પ્રતિકર્મ પ્રસાધનમ્
(૨.૫.૭૨૯) દશૈતે ત્રિષ્વલંકર્તાઽલંકરિષ્ણુશ્ચ મણ્ડિતઃ
(૨.૫.૭૩૦) પ્રસાધિતોઽલંકૃતશ્ચ ભૂષિતશ્ચ પરિષ્કૃતઃ
(૨.૫.૭૩૧) વિભ્રાડ્ભ્રાજિષ્ણુરોચિષ્ણૂ ભૂષણં સ્યાદલંક્રિયા
(૨.૫.૭૩૨) અલંકારસ્ત્વાભરણં પરિષ્કારો વિભૂષણમ્
(૨.૫.૭૩૩) મણ્ડનં ચાથ મુકુટં કિરીટં પુંનપુંસકમ્
(૨.૫.૭૩૪) ચૂડામણિઃ શિરોરત્નં તરલો હારમધ્યગઃ
(૨.૫.૭૩૫) વાલપાશ્યા પારિતથ્યા પત્રપાશ્યા લલાટિકા
(૨.૫.૭૩૬) કર્ણિકા તાલપત્રં સ્યાત્કુણ્ડલં કર્ણવેષ્ટનમ્
(૨.૫.૭૩૭) ગ્રૈવેયકં કણ્ઠભૂષા લમ્બનં સ્યાલ્લલન્તિકા
(૨.૫.૭૩૮) સ્વર્ણૈઃ પ્રાલમ્બિકાઽથોરઃસૂત્રિકા મૌક્તિકૈઃ કૃતા
(૨.૫.૭૩૯) હારો મુક્તાવલી દેવચ્છન્દોઽસૌ શતયષ્ટિકા
(૨.૫.૭૪૦) હારભેદા યષ્ટિભેદાદ્ગુચ્છગુચ્છાર્ધગોસ્તનાઃ
(૨.૫.૭૪૧) અર્ધહારો માણવક એકાવલ્યેકયષ્ટિકા
(૨.૫.૭૪૨) સૈવ નક્ષત્રમાલા સ્યાત્સપ્તવિંશતિમૌક્તિકૈઃ
(૨.૫.૭૪૩) આવાપકઃ પારિહાર્યઃ કટકો વલયોઽસ્ત્રિયામ્

(૨.૫.૭૪૪) કેયૂરમઙ્ગદં તુલ્યે અઙ્ગુલીયકમૂર્મિકા

(૨.૫.૭૪૫) સાક્ષરાઙ્ગુલિમુદ્રા સ્યાત્કઙ્કણં કરભૂષણમ્

(૨.૫.૭૪૬) સ્ત્રીકટ્યાં મેખલા કાઞ્ચી સપ્તકી રશના તથા

(૨.૫.૭૪૭) ક્લીબે સારસનં ચાથ પુંસ્કટ્યાં શ૱ઙ્ખલં ત્રિષુ

(૨.૫.૭૪૮) પાદાઙ્ગદં તુલાકોટિર્મઞ્જીરો નૂપુરોઽસ્ત્રિયામ્

(૨.૫.૭૪૯) હંસકઃ પાદકટકઃ કિઙ્કિણી ક્ષુદ્રઘણ્ટિકા

(૨.૫.૭૫૦) ત્વક્ફલકૃમિરોમાણિ વસ્ત્રયોનિર્દશ ત્રિષુ

(૨.૫.૭૫૧) વાલ્કં ક્ષૌમાદિ ફાલં તુ કાર્પાસં બાદરં ચ તત્

(૨.૫.૭૫૨) કૌશેયં કૃમિકોશોત્થં રાઙ્કવં મૃગરોમજમ્

(૨.૫.૭૫૩) અનાહતં નિષ્પ્રવાણિ તન્ત્રકં ચ નવામ્બરે

(૨.૫.૭૫૪) તસ્યાદુદ્ગમનીયં યદ્ધૌતયોર્વસ્ત્રયોર્યુગમ્

(૨.૫.૭૫૫) પત્રોર્ણં ધૌતકૌશેયં બહુમૂલ્યં મહાધનમ્

(૨.૫.૭૫૬) ક્ષૌમં દુકૂલં સ્યાદ્વે તુ નિવીતં પ્રાવૃતં ત્રિષુ

(૨.૫.૭૫૭) સ્ત્રિયાં બહુત્વે વસ્ત્રસ્ય દશાઃ સ્યુર્વસ્તયોર્દ્વયોઃ

(૨.૫.૭૫૮) દૈર્ઘ્યમાયામ આરોહઃ પરિણાહો વિશાલતા

(૨.૫.૭૫૯) પટચ્ચરં જીર્ણવસ્ત્રં સમૌ નક્તકકર્પટૌ

(૨.૫.૭૬૦) વસ્ત્રમાચ્છાદનં વાસશ્ચૈલં વસનમંશુકમ્

(૨.૫.૭૬૧) સુચેલકઃ પટોઽસ્ત્રી સ્યાદ્વરાશિઃ સ્થૂલશાટકઃ

(૨.૫.૭૬૨) નિચોલઃ પ્રચ્છદપટઃ સમૌ રલ્લકકમ્બલૌ

(૨.૫.૭૬૩) અન્તરીયોપસંવ્યાનપરિધાનાન્યધોંશુકે

(૨.૫.૭૬૪) દ્વૌ પ્રાવારોત્તરાસઙ્ગૌ સમૌ બૃહતિકા તથા

(૨.૫.૭૬૫) સંવ્યાનમુત્તરીયં ચ ચોલઃ કૂર્પાસકોઽસ્ત્રિયામ્

(૨.૫.૭૬૬) નીશારઃ સ્યાત્પ્રાવરણે હિમાઽનિલનિવારણે

(૨.૫.૭૬૭) અર્ધોરુકં વરસ્ત્રીણાં સ્યાચ્છણ્ડાતકમસ્ત્રિયામ્

(૨.૫.૭૬૮) સ્યાત્ ત્રિષ્વાપ્રપદીનં તત્પ્રાપ્નોત્યાપ્રપદં હિ યત્

(૨.૫.૭૬૯) અસ્ત્રી વિતાનમુલ્લોચો દૂષ્યાદ્યં વસ્ત્રવેશ્મનિ

(૨.૫.૭૭૦) પ્રતિસીરા જવનિકા સ્યાત્તિરસ્કરિણી ચ સા

(૨.૫.૭૭૧) પરિકર્માઙ્ગસંસ્કારઃ સ્યાન્માર્ષ્ટિર્માર્જના મૃજા

(૨.૫.૭૭૨) ઉદ્વર્તનોત્સાદને દ્વે સમે આપ્લાવ આપ્લવઃ

(૨.૫.૭૭૩) સ્નાનં ચર્ચા તુ ચાર્ચિક્યં સ્થાસકોઽથ પ્રબોધનમ્

(૨.૫.૭૭૪) અનુબોધઃ પત્રલેખા પત્રાઙ્ગુલિરિમે સમે

(૨.૫.૭૭૫) તમાલપત્રતિલકચિત્રકાણિ વિશેષકમ્

(૨.૫.૭૭૬)  દ્વિતીયં ચ તુરીયં ચ ન સ્ત્રિયામથ કુઙ્કુમમ્

(૨.૫.૭૭૭)  કાશ્મીરજન્માગ્નિશિખં વરં બાહ્લીકપીતને

(૨.૫.૭૭૮)  રક્તસંકોચપિશુનં ધીરં લોહિતચન્દનમ્

(૨.૫.૭૭૯)  લાક્ષા રાક્ષા જતુ ક્લીબે યાવોઽલક્તો દ્રુમામયઃ

(૨.૫.૭૮૦)  લવઙ્ગં દેવકુસુમં શ્રીસંજ્ઞમથ જાયકમ્

(૨.૫.૭૮૧)  કાલીયકં ચ કાલાનુસાર્યં ચાથ સમાર્થકમ્

(૨.૫.૭૮૨)  વંશિકાગુરુરાજાર્હલોહકૃમિજજોઙ્ગકમ્

(૨.૫.૭૮૩)  કાલાગુર્વગુરુ સ્યાત્તુ મઙ્ગલ્યા મલ્લિગન્ધિ યત્

(૨.૫.૭૮૪)  યક્ષધૂપઃ સર્જરસો રાલસર્વરસાવપિ

(૨.૫.૭૮૫)  બહુરૂપોઽપ્યથ વૃકધૂપકૃત્રિમધૂપકૌ

(૨.૫.૭૮૬)  તુરુષ્કઃ પિણ્ડકઃ સિહ્લો યાવનોઽપ્યથ પાયસઃ

(૨.૫.૭૮૭)  શ્રીવાસો વૃકધૂપોઽપિ શ્રીવેષ્ટસરલદ્રવૌ

(૨.૫.૭૮૮)  મૃગનાભિર્મૃગમદઃ કસ્તૂરી ચાથ કોલકમ્

(૨.૫.૭૮૯)  કઙ્કોલકં કોશફલમથ કર્પૂરમસ્ત્રિયામ્

(૨.૫.૭૯૦)  તૈલપર્ણિકગોશીર્ષે હરિચન્દનમસ્ત્રિયામ્

(૨.૫.૭૯૧)  તિલપર્ણી તુ પત્રાઙ્ગં રઞ્જનં રક્તચન્દનમ્

(૨.૫.૭૯૨)  કુચન્દનં ચાથ જાતીકોશજાતીફલે સમે

(૨.૫.૭૯૩)  કર્પૂરાગુરુકસ્તૂરીકક્કોલૈર્યક્ષકર્દમઃ

(૨.૫.૭૯૪)  ગાત્રાનુલેપની વર્તિર્વર્ણકં સ્યાદ્વિલેપનમ્

(૨.૫.૭૯૫)  ચૂર્ણાનિ વાસયોગાઃ સ્યુર્ભાવિતં વાસિતં ત્રિષુ

(૨.૫.૭૯૬)  સંસ્કારો ગન્ધમાલ્યાદ્યૈર્યઃ સ્યાત્તદધિવાસનમ્

(૨.૫.૭૯૭)  માલ્યં માલાસ્રજૌ મૂર્ધ્નિ કેશમધ્યે તુ ગર્ભકઃ

(૨.૫.૭૯૮)  પ્રભ્રષ્ટકં શિખાલમ્બિ પુરોન્યસ્તં લલામકમ્

(૨.૫.૭૯૯)  પ્રાલમ્બમૃજુલમ્બિ સ્યાત્કણ્ઠાદ્વૈકક્ષિકં તુ તત્

(૨.૫.૮૦૦)  યત્તિર્યક્ ક્ષિપ્તમુરસિ શિખાસ્વાપીડશેખરૌ

(૨.૫.૮૦૧)  રચના સ્યાત્પરિસ્યન્દ આભોગઃ પરિપૂર્ણતા

(૨.૫.૮૦૨)  ઉપધાનં તૂપબર્હઃ શય્યાયાં શયનીયવત્

(૨.૫.૮૦૩)  શયનં મઞ્ચપર્યઙ્કપલ્યઙ્કાઃ ખટ્વ્યા સમાઃ

(૨.૫.૮૦૪)  ગેન્દુકઃ કન્દુકો દીપઃ પ્રદીપઃ પીઠમાસનમ્

(૨.૫.૮૦૫)  સમુદ્ગકઃ સંપુટકઃ પ્રતિગ્રાહઃ પતદ્ગ્રહઃ

(૨.૫.૮૦૬)  પ્રસાધની કઙ્કતિકા પિષ્ટાતઃ પટવાસકઃ

(૨.૫.૮૦૭)  દર્પણે મુકુરાદર્શૌ વ્યજનં તાલવૃન્તકમ્  । ઇતિ મનુષ્યવર્ગઃ

(૨.૬.૮૦૮) સંતતિર્ગોત્રજનનકુલાન્યભિજનાન્વયૌ । અથ બ્રહ્મવર્ગઃ
(૨.૬.૮૦૯) વંશોઽન્વવાયઃ સંતાનો વર્ણાઃ સ્યુર્બ્રાહ્મણાદયઃ
(૨.૬.૮૧૦) વિપ્રક્ષત્રિયવિટ્ શૂદ્રાશ્ચાતુર્વર્ણ્યમિતિ સ્મૃતમ્
(૨.૬.૮૧૧) રાજબીજી રાજવંશ્યો બીજ્યસ્તુ કુલસંભવઃ
(૨.૬.૮૧૨) મહાકુલકુલીનાર્યસભ્યસજ્જનસાધવઃ
(૨.૬.૮૧૩) બ્રહ્મચારી ગૃહી વાનપ્રસ્થો ભિક્ષુશ્ચતુષ્ટયે
(૨.૬.૮૧૪) આશ્રમોઽસ્ત્રી દ્વિજાત્યગ્રજન્મભૂદેવવાડવાઃ
(૨.૬.૮૧૫) વિપ્રશ્ચ બ્રાહ્મણોઽસૌ ષટ્કર્મા યાગાદિભિર્વૃતઃ
(૨.૬.૮૧૬) વિદ્વાન્વિપશ્ચિદ્દોષજ્ઞઃ સન્સુધીઃ કોવિદો બુધઃ
(૨.૬.૮૧૭) ધીરો મનીષી જ્ઞઃ પ્રાજ્ઞઃ સંખ્યાવાન્પણ્ડિતઃ કવિઃ
(૨.૬.૮૧૮) ધીમાન્સૂરિઃ કૃતી કૃષ્ટિર્લબ્ધવર્ણો વિચક્ષણઃ
(૨.૬.૮૧૯) દૂરદર્શી દીર્ઘદર્શી શ્રોત્રિયચ્છાન્દસૌ સમૌ
(૨.૬.૮૨૦) મીમાંસકો જૈમિનીયે વેદાન્તી બ્રહ્મવાદિનિ
(૨.૬.૮૨૧) વૈશેષિકે સ્યાદૌલૂક્યઃ સૌગતઃ શૂન્યવાદિનિ
(૨.૬.૮૨૨) નૈયાયિકસ્ત્વક્ષપાદઃ સ્યાત્સ્યાદ્વાદિક આર્હકઃ
(૨.૬.૮૨૩) ચાર્વાકલૌકાયતિકૌ સત્કાર્યે સાંખ્યકાપિલૌ
(૨.૬.૮૨૪) ઉપાધ્યાયોઽધ્યાપકોઽથ સ્યાન્નિષેકાદિકૃદ્ગુરુઃ
(૨.૬.૮૨૫) મન્ત્રવ્યાખ્યાકૃદાચાર્ય આદેષ્ટા ત્વધ્વરે વ્રતી
(૨.૬.૮૨૬) યષ્ટા ચ યજમાનશ્ચ સ સોમવતિ દીક્ષિતઃ
(૨.૬.૮૨૭) ઇજ્યાશીલો યાયજૂકો યજ્વા તુ વિધિનેષ્ટવાન્
(૨.૬.૮૨૮) સ ગીર્પતીષ્ટ્યા સ્થપતિઃ સોમપીથી તુ સોમપાઃ
(૨.૬.૮૨૯) સર્વવેદાઃ સ યેનેષ્ટો યાગઃ સર્વસ્વદક્ષિણઃ
(૨.૬.૮૩૦) અનૂચાનઃ પ્રવચને સાઙ્ગેઽધીતી ગુરોસ્તુ યઃ
(૨.૬.૮૩૧) લબ્ધાનુજ્ઞઃ સમાવૃત્તઃ સુત્વા ત્વભિષવે કૃતે
(૨.૬.૮૩૨) છાત્રાન્તેવાસિનૌ શિષ્યે શૈક્ષાઃ પ્રાથમકલ્પિકાઃ
(૨.૬.૮૩૩) એકબ્રહ્મવ્રતાચારા મિથઃ સબ્રહ્મચારિણઃ
(૨.૬.૮૩૪) સતીર્થ્યાસ્ત્વેકગુરવશ્ચિતવાનગ્નિમગ્નિચિત્
(૨.૬.૮૩૫) પારમ્પર્યોપદેશે સ્યાદૈતિહ્યમિતિહાવ્યયમ્
(૨.૬.૮૩૬) ઉપજ્ઞા જ્ઞાનમાદ્યં સ્યાજ્જ્ઞાત્વારમ્ભ ઉપક્રમઃ
(૨.૬.૮૩૭) યજ્ઞઃ સવોઽધ્વરો યાગઃ સપ્તતન્તુર્મખઃ ક્રતુઃ
(૨.૬.૮૩૮) પાઠો હોમશ્ચાતિથીનાં સપર્યા તર્પણં બલિઃ
(૨.૬.૮૩૯) એતે પઞ્ચમહાયજ્ઞા બ્રહ્મયજ્ઞાદિનામકાઃ

(૨.૬.૮૪૦) સમજ્યા પરિષદ્ગોષ્ઠી સભાસમિતિસંસદઃ
(૨.૬.૮૪૧) આસ્થાની ક્લીબમાસ્થાનં સ્ત્રીનપુંસકયોઃ સદઃ
(૨.૬.૮૪૨) પ્રાગ્વંશઃ પ્રાગ્ હવિર્ગેહાત્સદસ્યા વિધિદર્શિનઃ
(૨.૬.૮૪૩) સભાસદઃ સભાસ્તારાઃ સભ્યાઃ સામાજિકાશ્ચ તે
(૨.૬.૮૪૪) અધ્વર્યૂદ્ગાતૃહોતારો યજુઃસામર્ગ્વિદઃ ક્રમાત્
(૨.૬.૮૪૫) આગ્નીગ્રાધ્રા ધનૈર્વાર્યા ઋત્વિજો યાજકાશ્ચ તે
(૨.૬.૮૪૬) વેદિઃ પરિષ્કૃતા ભુમિઃ સમે સ્થણ્ડિલચત્વરે
(૨.૬.૮૪૭) ચષાલો યૂપકટકઃ કુમ્બા સુગહના વૃતિઃ
(૨.૬.૮૪૮) યૂપાગ્રં તર્મ નિર્મન્થ્યદારુણિ ત્વરણિર્દ્વયોઃ
(૨.૬.૮૪૯) દક્ષિણાગ્નિર્ગાર્હપત્યાહવનીયૌ ત્રયોઽગ્નયઃ
(૨.૬.૮૫૦) અગ્નિત્રયમિદં ત્રેતા પ્રણીતઃ સંસ્કૃતોઽનલઃ
(૨.૬.૮૫૧) સમૂહ્યઃ પરિચાય્યોપચાય્યાવગ્નૌ પ્રયોગિણઃ
(૨.૬.૮૫૨) યો ગાર્હપત્યાદાનીય દક્ષિણાગ્નિઃ પ્રણીયતે
(૨.૬.૮૫૩) તસ્મિન્નાનાય્યોઽથાગ્નાયી સ્વાહા ચ હુતભુક્પ્રિયા
(૨.૬.૮૫૪) ઋક્સામિધેની ધાય્યા ચ યા સ્યાદગ્નિસમિન્ધને
(૨.૬.૮૫૫) ગાયત્રીપ્રમુખં છન્દો હવ્યપાકે ચરુઃ પુમાન્
(૨.૬.૮૫૬) આમિક્ષા સા શ ૃતોષ્ણે યા ક્ષીરે સ્યાદ્દધિયોગતઃ
(૨.૬.૮૫૭) ધવિત્રં વ્યજનં તદ્યદ્રચિતં મૃગચર્મણા
(૨.૬.૮૫૮) પૃષદાજ્યં સદધ્યાજ્યે પરમાન્નં તુ પાયસમ્
(૨.૬.૮૫૯) હવ્યકવ્યે દૈવપિત્ર્યે અન્ને પાત્રં સ્રુવાદિકમ્
(૨.૬.૮૬૦) ધ્રુવોપભૃજ્જુહૂર્ના તુ સ્રુવો ભેદાઃ સ્રુચઃ સ્ત્રિયઃ
(૨.૬.૮૬૧) ઉપાકૃતઃ પશુરસૌ યોઽભિમન્ત્ર્ય ક્રતૌ હતઃ
(૨.૬.૮૬૨) પરમ્પરાકમ્ શમનં પ્રોક્ષણં ચ વધાર્થકમ્
(૨.૬.૮૬૩) વાચ્યલિઙ્ગાઃ પ્રમીતોપસંપન્નપ્રોક્ષિતા હતે
(૨.૬.૮૬૪) સાંનાય્યં હવિરગ્નૌ તુ હુતં ત્રિષુ વષટ્ કૃતમ્
(૨.૬.૮૬૫) દીક્ષાન્તોઽવભૃતો યજ્ઞે તત્કર્માર્હં તુ યજ્ઞિયમ્
(૨.૬.૮૬૬) ત્રિષ્વથ ક્રતુકર્મેષ્ટં પૂર્તં ખાતાદિ કર્મ યત્
(૨.૬.૮૬૭) અમૃતં વિઘસો યજ્ઞશેષભોજનશેષયોઃ
(૨.૬.૮૬૮) ત્યાગો વિહાપિતં દાનમુત્સર્જનવિસર્જને
(૨.૬.૮૬૯) વિશ્રાણનં વિતરણં સ્પર્શનં પ્રતિપાદનમ્
(૨.૬.૮૭૦) પ્રાદેશનં નિર્વપણમપવર્જનમંહતિઃ
(૨.૬.૮૭૧) મ્રાર્થં તદહે દાનં ત્રિષુ સ્યાદૌર્ધ્વદેહિકમ્

(૨.૬.૮૭૨)  પિતૃદાનં નિવાપઃ સ્યાચ્છ્રાદ્ધં તત્કર્મ શસ્ત્રતઃ

(૨.૬.૮૭૩)  અન્વાહાર્યં માસિકેંઽશોઽષ્ટમોઽહ્નઃ કુતપોઽસ્ત્રિયામ્

(૨.૬.૮૭૪)  પર્યેષણા પરીષ્ટિશ્ચાન્વેષણા ચ ગવેષણા

(૨.૬.૮૭૫)  સનિસ્ત્વધ્યેષણા યાચ્ઞાઽભિશસ્તિર્યાચનાર્થના

(૨.૬.૮૭૬)  ષટ્તુ ત્રિષ્વર્ઘ્યમર્ઘાર્થે પાદ્યં પાદાય વારિણિ

(૨.૬.૮૭૭)  ક્રમાદાતિથ્યાતિથેયે અતિથ્યર્થેઽત્ર સાધુનિ

(૨.૬.૮૭૮)  સ્યુરાવેશિક આગન્તુરતિથિર્ના ગૃહાગતે

(૨.૬.૮૭૯)  પ્રાઘૂર્ણિકઃ પ્રાઘૂણકશ્ચાભ્યુત્થાનં તુ ગૌરવમ્

(૨.૬.૮૮૦)  પૂજા નમસ્યાપચિતિઃ સપર્યાર્ચાર્હણાઃ સમાઃ

(૨.૬.૮૮૧)  વરિવસ્યા તુ શુશ્રૂષા પરિચર્યાપ્યુપાસના

(૨.૬.૮૮૨)  વ્રજ્યાટાટ્યા પર્યટનં ચર્યા ત્વીર્યાપથે સ્થિતિઃ

(૨.૬.૮૮૩)  ઉપસ્પર્શસ્ત્વાચમનમથ મૌનમભાષણમ્

(૨.૬.૮૮૪)  પ્રાચેતસશ્ચાદિકવિઃ સ્યાન્મૈત્રાવરુણિશ્ચ સઃ

(૨.૬.૮૮૫)  વાલ્મીકશ્ચાથ ગાધેયો વિશ્વામિત્રશ્ચ કૌશિકઃ

(૨.૬.૮૮૬)  વ્યાસો દ્વૈપાયનઃ પારાશર્યઃ સત્યવતીસુતઃ

(૨.૬.૮૮૭)  આનુપૂર્વી સ્ત્રિયાં વાવૃત્પરિપાઠી અનુક્રમઃ

(૨.૬.૮૮૮)  પર્યાયશ્ચાતિપાતસ્તુ સ્યાત્પર્યય ઉપાત્યયઃ

(૨.૬.૮૮૯)  નિયમો વ્રતમસ્ત્રી તચ્ચોપવાસાદિ પુણ્યકમ્

(૨.૬.૮૯૦)  ઔપવસ્તં તૂપવાસઃ વિવેકઃ પૃથગાત્મતા

(૨.૬.૮૯૧)  સ્યાદ્બ્રહ્મવર્ચસં વૃત્તાધ્યયનર્દ્ધિરથાઞ્જલિઃ

(૨.૬.૮૯૨)  પાઠે બ્રહ્માઞ્જલિઃ પાઠે વિપ્રુષો બ્રહ્મબિન્દવઃ

(૨.૬.૮૯૩)  ધ્યાનયોગાસને બ્રહ્માસનં કલ્પે વિધિક્રમૌ

(૨.૬.૮૯૪)  મુખ્યઃ સ્યાત્પ્રથમઃ કલ્પોઽનુકલ્પસ્તુ તતોઽધમઃ

(૨.૬.૮૯૫)  સંસ્કારપૂર્વં ગ્રહણં સ્યાદુપાકરણં શ્રુતેઃ

(૨.૬.૮૯૬)  સમે તુ પાદગ્રહણમભિવાદનમિત્યુભે

(૨.૬.૮૯૭)  ભિક્ષુઃ પરિવ્રાટ્ કર્મન્દી પારાશર્યપિ મસ્કરી

(૨.૬.૮૯૮)  તપસ્વી તાપસઃ પારિકાઙ્ક્ષી વાચંયમો મુનિઃ

(૨.૬.૮૯૯)  તપઃક્લેશસહો દાન્તો વર્ણિનો બ્રહ્મચારિણઃ

(૨.૬.૯૦૦)  ઋષયઃ સત્યવચસઃ સ્નાતકસ્ત્વાપ્લુતો વ્રતી

(૨.૬.૯૦૧)  યે નિર્જિતેન્દ્રિયગ્રામા યતિનો યતયશ્ચ તે

(૨.૬.૯૦૨)  યઃ સ્થણ્ડિલે વ્રતવશાચ્છેતે  સ્થણ્ડિલશાય્યસૌ

(૨.૬.૯૦૩)  સ્થાણ્ડિલશ્ચાથ વિરજસ્તમસઃ સ્યુર્દ્વયાતિગાઃ

(૨.૬.૯૦૪)  પવિત્રઃ પ્રયતઃ પૂતઃ પાષણ્ડાઃ સર્વલિઙ્ગિનઃ

(૨.૬.૯૦૫)  પાલાશો દણ્ડ આષાઢો વ્રતે રામ્ભસ્તુ વૈણવઃ

(૨.૬.૯૦૬)  અસ્ત્રી કમણ્ડલુઃ કુણ્ડી વ્રતિનામાસનં બૃષી

(૨.૬.૯૦૭)  અજિનં ચર્મ કૃત્તિઃ સ્ત્રી ભૈક્ષં ભિક્ષાકદમ્બકમ્

(૨.૬.૯૦૮)  સ્વાધ્યાયઃ સ્યાજ્જપઃ સુત્યાભિષવઃ સવનં ચ સા

(૨.૬.૯૦૯)  સર્વૈનસામપધ્વંસિ જપ્યં ત્રિષ્વઘમર્ષણમ્

(૨.૬.૯૧૦)  દર્શશ્ચ પૌર્ણમાસશ્ચ યાગૌ પક્ષાન્તયોઃ પૃથક્

(૨.૬.૯૧૧)  શરીરસાધનાપેક્ષં નિત્યં યત્કર્મ તદ્યમઃ

(૨.૬.૯૧૨)  નિયમસ્તુ સ યત્કર્મ નિત્યમાગન્તુસાધનમ્

(૨.૬.૯૧૩)  ક્ષૌરમ્ તુ ભદ્રાકરણં મુણ્ડનં વપનં ત્રિષુ

(૨.૬.૯૧૪)  કક્ષાપટી ચ કૌપીનં શાટી ચ સ્ત્રીતિ લક્ષ્યતઃ

(૨.૬.૯૧૫)  ઉપવીતં બ્રહ્મસૂત્રં પ્રોદ્ધૃતે દક્ષિણે કરે

(૨.૬.૯૧૬)  પ્રાચીનાવીતમન્યસ્મિન્નિવીતં કણ્ઠલમ્બિતમ્

(૨.૬.૯૧૭)  અઙ્ગુલ્યગ્રે તીર્થં દૈવં સ્વલ્પાઙ્ગુલ્યોર્મૂલે કાયમ્

(૨.૬.૯૧૮)  મધ્યેઽઙ્ગુષ્ઠાઙ્ગુલ્યોઃ પિત્ર્યં મૂલે ત્વઙ્ગુષ્ઠસ્ય બ્રાહ્મમ્

(૨.૬.૯૧૯)  સ્યાદ્બ્રહ્મભૂયં બ્રહ્મત્વં બ્રહ્મસાયુજ્યમિત્યપિ

(૨.૬.૯૨૦)  દેવભૂયાદિકં તદ્વત્ ्ँહ્છં સાન્તપનાદિકમ્

(૨.૬.૯૨૧)  સંન્યાસવત્યનશને પુમાન્પ્રાયોઽથ વીરહા

(૨.૬.૯૨૨)  નષ્ટાગ્નિઃ કુહના લોભાન્મિથ્યેર્યાપથકલ્પના

(૨.૬.૯૨૩)  વ્રાત્યઃ સંસ્કારહીનઃ સ્યાદસ્વાધ્યાયો નિરાકૃતિઃ

(૨.૬.૯૨૪)  ધર્મધ્વજી લિઙ્ગવૃત્તિરવકીર્ણી ક્ષતવ્રતઃ

(૨.૬.૯૨૫)  સુપ્તે યસ્મિન્નસ્તમેતિ સુપ્તે યસ્મિન્નુદેતિ ચ

(૨.૬.૯૨૬)  અંશુમાનભિનિર્મુક્તાભ્યુદિતૌ ચ યથાક્રમમ્

(૨.૬.૯૨૭)  પરિવેત્તાનુજોઽનૂઢે જ્યેષ્ઠે દારપરિગ્રહાત્

(૨.૬.૯૨૮)  પરિવિત્તિસ્તુ તજ્જાયાન્વિવાહોપયમૌ સમૌ

(૨.૬.૯૨૯)  તથા પરિણયોદ્વાહોપયામાઃ પાણિપીડનમ્

(૨.૬.૯૩૦)  વ્યવાયો ગ્રામ્યધર્મો મૈથુનં નિધુવનં રતમ્

(૨.૬.૯૩૧)  ત્રિવર્ગોધર્મકામાર્થૈશ્ચતુર્વર્ગઃ સમોક્ષકૈઃ

(૨.૬.૯૩૨)  સબલૈસ્તૈશ્ચતુર્ભદ્રં જન્યાઃ સ્નિગ્ધાઃ વરસ્ય યે   । ઇતિ બ્રહ્મવર્ગઃ

(૨.૭.૯૩૩)  મૂર્ધાભિષિક્તો રાજન્યો બાહુજઃ ક્ષત્રિયો વિરાટ્   । અથ ક્ષત્રિયવર્ગઃ

(૨.૭.૯૩૪)  રાજા રાટ્ પાર્થિવક્ષ્માભૃન્નૃપભૂપમહીક્ષિતઃ

(૨.૭.૯૩૫)  રાજા તુ પ્રણતાશષસામન્તઃ સ્યાદધીશ્વરઃ

(૨.૭.૯૩૬) ચક્રવર્તી સાર્વભૌમો નૃપોઽન્યો મણ્ડલેશ્વરઃ

(૨.૭.૯૩૭) યેનેષ્ટં રાજસૂયેન મણ્ડલસ્યેશ્વરશ્ચ યઃ

(૨.૭.૯૩૮) શાસ્તિ યશ્ચાજ્ઞયા રાજ્ઞઃ સ સમ્રાડથ રાજકમ્

(૨.૭.૯૩૯) રાજન્યકં ચ નૃપતિક્ષત્રિયાણાં ગણે ક્રમાત્

(૨.૭.૯૪૦) મન્ત્રી ધીસચિવોઽમાત્યોઽન્યે કર્મસચિવાસ્તતઃ

(૨.૭.૯૪૧) મહામાત્રા પ્રધાનાનિ પુરોધાસ્તુ પુરોહિતઃ

(૨.૭.૯૪૨) દ્રષ્ટરિ વ્યવહારાણાં પ્રાડ્વિવાકાક્ષદર્શકૌ

(૨.૭.૯૪૩) પ્રતીહારો દ્વારપાલદ્વાસ્થદ્વાસ્થિતદર્શકાઃ

(૨.૭.૯૪૪) રક્ષિવર્ગસ્ત્વનીકસ્થોઽથાધ્યક્ષાધિકૃતૌ સમૌ

(૨.૭.૯૪૫) સ્થાયુકોઽધિકૃતો ગ્રામે ગોપો ગ્રામેષુ ભૂરિષુ

(૨.૭.૯૪૬) ભૌરિકઃ કનકાધ્યક્ષો રૂપ્યાધ્યક્ષસ્તુ નૈષ્કિકઃ

(૨.૭.૯૪૭) અન્તઃપુરે ત્વધિકૃતઃ સ્યાદન્તર્વંશિકો જનઃ

(૨.૭.૯૪૮) સૌવિદલ્લાઃ કઞ્ચુકિનઃ સ્થાપત્યાઃ સૌવિદાશ્ચ તે

(૨.૭.૯૪૯) શણ્ઢો વર્ષવરસ્તુલ્યૌ સેવકાર્થ્યનુજીવિનઃ

(૨.૭.૯૫૦) વિષયાનન્તરો રાજા શત્રુર્મિત્રમતઃ પરમ્

(૨.૭.૯૫૧) ઉદાસીનઃ પરતરઃ પાર્ષ્ણિગ્રાહસ્તુ પૃષ્ઠતઃ

(૨.૭.૯૫૨) રિપૌ વૈરિસપત્નારિદ્વિષદ્વેષણદુર્હૃદઃ

(૨.૭.૯૫૩) દ્વિડ્ વિપક્ષાહિતામિત્રદસ્યુશાત્રવશત્રવઃ

(૨.૭.૯૫૪) અભિઘાતિપરારાતિપ્રત્યર્થિપરિપન્થિનઃ

(૨.૭.૯૫૫) વયસ્યઃ સ્નિગ્ધઃ સવયા અથ મિત્રં સખા સુહૃત્

(૨.૭.૯૫૬) સખ્યં સાપ્તપદીનં સ્યાદનુરોધોઽનુવર્તનમ્

(૨.૭.૯૫૭) યથાર્હવર્ણઃ પ્રણિધિરપસર્પશ્ચરઃ સ્પશઃ

(૨.૭.૯૫૮) ચારશ્ચ ગૂઢપુરુષશ્ચાપ્તપ્રત્યયિતૌ સમૌ

(૨.૭.૯૫૯) સાંવત્સરો જ્યૌતિષિકો દૈવજ્ઞગણકાવપિ

(૨.૭.૯૬૦) સ્યુર્મૌહૂર્તિકમૌહૂર્તજ્ઞાનિકાર્તાન્તિકા અપિ

(૨.૭.૯૬૧) તાન્ત્રિકો જ્ઞાતસિદ્ધાન્તઃ સત્રી ગૃહપતિઃ સમૌ

(૨.૭.૯૬૨) લિપિકારોઽક્ષરચણોઽક્ષરચુઞ્ચુશ્ચ લેખકે

(૨.૭.૯૬૩) લિખિતાક્ષરવિન્યાસે (સંસ્થાને) લિપિર્લિબ્(ભ્)ઇરુભે સ્ત્રિયૌ

(૨.૭.૯૬૪) સ્યાત્સંદેશહરો દૂતો દૂત્યં તદ્ભાવકર્મણી

(૨.૭.૯૬૫) અધ્વનીનોઽધ્વગોઽધ્વન્યઃ પાન્થઃ પથિક ઇત્યપિ

(૨.૭.૯૬૬) સ્વામ્યમાત્યસુહૃત્કોશરાષ્ટ્રદુર્ગબલાનિ ચ

(૨.૭.૯૬૭) રાજ્યાઙ્ગાનિ પ્રકૃતયઃ પૌરાણાં શ્રેનયોઽપિ ચ

(૨.૭.૯૬૮) સંધિર્ના વિગ્રહો યાનમાસનં દ્વૈધમાશ્રયઃ

(૨.૭.૯૬૯) ષડ્ગુણાઃ શક્તયસ્તિસ્રઃ પ્રભાવોત્સાહમન્ત્રજાઃ

(૨.૭.૯૭૦) ક્ષયઃ સ્થાનં ચ વૃદ્ધિશ્ચ ત્રિવર્ગો નીતિવેદિનામ્

(૨.૭.૯૭૧) સ પ્રતાપઃ પ્રભાવશ્ચ યત્તેજઃ કોશદણ્ડજમ્

(૨.૭.૯૭૨) ભેદો દણ્ડઃ સામ દાનમિત્યુપાયચતુષ્ટયમ્

(૨.૭.૯૭૩) સાહસં તુ સમો (દમો) દણ્ડઃ સામ સાન્ત્વમથો સમૌ

(૨.૭.૯૭૪) ભેદોપજાપાવુપધા ધર્માદ્યૈર્યત્પરીક્ષણમ્

(૨.૭.૯૭૫) પઞ્ચ ત્રિષ્વષડક્ષીણો યસ્તૃતીયાદ્યગોચરઃ

(૨.૭.૯૭૬) વિવિક્તવિજનચ્છન્નનિઃશલાકાસ્તથા રહઃ

(૨.૭.૯૭૭) રહશ્ચોપાંશુ ચાલિઙ્ગે રહસ્યં તદ્ભવે ત્રિષુ

(૨.૭.૯૭૮) સમૌ વિસ્રમ્ભવિશ્વાસૌ ભ્રેષો ભ્રંશો યથોચિતાત્

(૨.૭.૯૭૯) અભ્રેષાન્યાયકલ્પાસ્તુ દેશરૂપં સમઞ્જસમ્

(૨.૭.૯૮૦) યુક્તમૌપયિકં લભ્યં ભજમાનાભિનીતવત્

(૨.૭.૯૮૧) ન્યાય્યં ચ ત્રિષુ ષટ્ સંપ્રધારણા તુ સમર્થનમ્

(૨.૭.૯૮૨) અવવાદસ્તુ નિર્દેશો નિદેશઃ શાસનં ચ સઃ

(૨.૭.૯૮૩) શિષ્ટિશ્ચાજ્ઞા ચ સંસ્થા તુ મર્યાદા ધારણા સ્થિતિઃ

(૨.૭.૯૮૪) સુધરણા સુધારા સ્ત્રી સુસ્થિતિઃ સુદશોન્નતિઃ

(૨.૭.૯૮૫) આગોऽપરાધો મન્તુશ્ચ સમે તૂદ્દાનબન્ધને

(૨.૭.૯૮૬) દ્વિપાદ્યો દ્વિગુણો દણ્ડો ભાગધેયઃ કરો બલિઃ

(૨.૭.૯૮૭) ઘટ્ટાદિદેયં શુલ્કોऽસ્ત્રી પ્રાભૃતં તુ પ્રદેશનમ્

(૨.૭.૯૮૮) ઉપાયનમુપગ્રાહ્યમુપહારસ્તથોપદા

(૨.૭.૯૮૯) યૌતકાદિ તુ યદ્દેયં સુદાયો હરણં ચ તત્

(૨.૭.૯૯૦) તત્કાલસ્તુ તદાત્વં સ્યાદુત્તરઃ કાલ આયતિઃ

(૨.૭.૯૯૧) સાંદૃષ્ટિકં ફલં સદ્યઃ ઉદર્કઃ ફલમુત્તરમ્

(૨.૭.૯૯૨) અદૃષ્ટં વહ્નિતોયાદિ દૃષ્ટં સ્વપરચક્રજમ્

(૨.૭.૯૯૩) મહીભુજામહિભયં સ્વપક્ષપ્રભવં ભયમ્

(૨.૭.૯૯૪) પ્રક્રિયા ત્વધિકારઃ સ્યાચ્ચામરં તુ પ્રકીર્ણકમ્

(૨.૭.૯૯૫) નૃપાસનં યત્તદ્ભદ્રાસનં સિંહાસનં તુ તત્

(૨.૭.૯૯૬) હૈમં છત્રં ત્વાતપત્રં રાજ્ઞસ્તુ નૃપલક્ષ્મ તત્

(૨.૭.૯૯૭) ભદ્રકુમ્ભઃ પૂર્ણકુમ્ભો ભૃઙ્ગારઃ કનકાલુકા

(૨.૭.૯૯૮) નિવેશઃ શિબિરં ષણ્ઢે સજ્જનં તૂપરક્ષણમ્

(૨.૭.૯૯૯) હસ્ત્યશ્વરથપાદાતં સેનાઙ્ગં સ્યાચ્ચતુષ્ટયમ્

(૨.૭.૧૦૦૦) દન્તી દન્તાવલો હસ્તી દ્વિરદોઽનેકપો દ્વિપઃ

(૨.૭.૧૦૦૧) મતઙ્ગજો ગજો નાગઃ કુઞ્જરો વારણઃ કરી

(૨.૭.૧૦૦૨) ઇભઃ સ્તમ્બેરભઃ પદ્મી યૂથનાથસ્તુ યૂથપઃ

(૨.૭.૧૦૦૩) મદોત્કટો મદકલઃ કલભઃ કરિશાવકઃ

(૨.૭.૧૦૦૪) પ્રભિન્નો ગર્જિતો મત્તઃ સમાવુદ્વાન્તનિર્મદૌ

(૨.૭.૧૦૦૫) હાસ્તિકં ગજતા વૃન્દે કરિણી ધેનુકા વશા

(૨.૭.૧૦૦૬) ગણ્ડઃ કટો મદો દાનં વમથુઃ કરશીકરઃ

(૨.૭.૧૦૦૭) કુમ્ભૌ તુ પિણ્ડૌ શિરસસ્તયોર્મધ્યે વિદુઃ પુમાન્

(૨.૭.૧૦૦૮) અવગ્રહો લલાટં સ્યાદીષિકા ત્વક્ષિકૂટકમ્

(૨.૭.૧૦૦૯) અપાઙ્ગદેશો નિર્યાણં કર્ણમૂલં તુ ચૂલિકા

(૨.૭.૧૦૧૦) અધઃ કુમ્ભસ્ય વાહિત્થં પ્રતિમાનમધોઽસ્ય યત્

(૨.૭.૧૦૧૧) આસનં સ્કન્ધદેશઃ સ્યાત્પદ્મકં બિન્દુજાલકમ્

(૨.૭.૧૦૧૨) પાર્શ્વભાગઃ પક્ષભાગો દન્તભાગસ્તુ યોઽગ્રતઃ

(૨.૭.૧૦૧૩) દ્વૌ પૂર્વપશ્ચાજ્જઙ્ઘાદિદેશૌ ગાત્રાવરે ક્રમાત્

(૨.૭.૧૦૧૪) તોત્રં વેણુકમાલાનં બન્ધસ્તમ્ભેઽથ શ◌ૃઙ્ખલે

(૨.૭.૧૦૧૫) અન્દુકો નિગડોઽસ્ત્રી સ્યાદઙ્કુશોઽસ્ત્રી સૃણિઃ સ્ત્રિયામ્

(૨.૭.૧૦૧૬) દૂષ્યા (ચૂષા) કક્ષ્યા વરત્રા સ્યાત્કલ્પના સજ્જના સમે

(૨.૭.૧૦૧૭) પ્રવેણ્યાસ્તરણં વર્ણઃ પરિસ્તોમઃ કુથો દ્વયોઃ

(૨.૭.૧૦૧૮) વીતં ત્વસારં હસ્ત્યશ્વં વારી તુ ગજબન્ધની

(૨.૭.૧૦૧૯) ઘોટકે વીતિ (પીતિ)તુરગતુરઙ્ગાશ્વતુરઙ્ગમાઃ

(૨.૭.૧૦૨૦) વાજિવાહાર્વગન્ધર્વહયસૈન્ધવસપ્તયઃ

(૨.૭.૧૦૨૧) આજાનેયાઃ કુલીનાઃ સ્યુર્વિનીતાઃ સાધુવાહિનઃ

(૨.૭.૧૦૨૨) વનાયુજાઃ પારસીકાઃ કામ્બોજાઃ બાહ્લિકા હયાઃ

(૨.૭.૧૦૨૩) યયુરશ્વોઽશ્વમેધીયો જવનસ્તુ જવાધિકઃ

(૨.૭.૧૦૨૪) પૃષ્ઠ્યઃ સ્થૌરી સિતઃ કર્કો રથ્યો વોઢા રથસ્ય યઃ

(૨.૭.૧૦૨૫) બાલઃ કિશોરો વામ્યશ્વા વડવા વાડવં ગણે

(૨.૭.૧૦૨૬) ત્રિષ્વાશ્વીનં યદશ્વેન દિનેનૈકેન ગમ્યતે

(૨.૭.૧૦૨૭) કશ્યં તુ મધ્યમશ્વાનાં હેષા હ્રેષા ચ નિસ્વનઃ

(૨.૭.૧૦૨૮) નિગાલસ્તુ ગલોદ્દેશો વૃન્દે ત્વશ્વીયમાશ્વવત્

(૨.૭.૧૦૨૯) આસ્કન્દિતં ધૌરિતકં રેચિતમ્ વલ્ગિતં પ્લુતમ્

(૨.૭.૧૦૩૦) ગતયોઽમૂઃ પઞ્ચ ધારા ઘોણા તુ પ્રોથમસ્ત્રિયામ્

(૨.૭.૧૦૩૧) કવિકા તુ ખલીનોઽસ્ત્રી શફં ક્લીબે ખુરઃ પુમાન્

(૨.૭.૧૦૩૨) પુચ્છોઽસ્ત્રી લૂમલાઙ્ગૂલે વાલહસ્તશ્ચ વાલધિઃ
(૨.૭.૧૦૩૩) ત્રિષૂપાવૃત્તલુઠિતૌ પરાવૃત્તે મુહુર્ભુવિ
(૨.૭.૧૦૩૪) યાને ચક્રિણિ યુદ્ધાર્થે શતાઙ્ગઃ સ્યન્દનો રથઃ
(૨.૭.૧૦૩૫) અસૌ પુષ્પરથશ્ચક્રયાનં ન સમરાય યત્
(૨.૭.૧૦૩૬) કર્ણીરથઃ પ્રવહણં ડયનં ચ સમં ત્રયમ્
(૨.૭.૧૦૩૭) ક્લીબેઽનઃ શકટોઽસ્ત્રી સ્યાદ્ગન્ત્રી કમ્બલિવાહ્યકમ્
(૨.૭.૧૦૩૮) શિબિકા યાપ્યયાનં સ્યાદ્દોલા પ્રેઙ્ખાદિકાઃ સ્ત્રિયામ્
(૨.૭.૧૦૩૯) ઉભૌ તુ દ્વૈપવૈયાઘ્રૌ દ્વીપિચર્માવૃતે રથે
(૨.૭.૧૦૪૦) પાણ્ડુકમ્બલસંવીતઃ સ્યન્દનઃ પાણ્ડુકમ્બલી
(૨.૭.૧૦૪૧) રથે કામ્બલવાસ્ત્રાદ્યાઃ કમ્બલાદિભિરાવૃતે
(૨.૭.૧૦૪૨) ત્રિષુ દ્વૈપાદયો રથ્યા રથકડ્યા રથવ્રજે
(૨.૭.૧૦૪૩) ધૂઃ સ્ત્રી ક્લીબે યાનમુખં સ્યાદ્રથાઙ્ગમપસ્કરઃ
(૨.૭.૧૦૪૪) ચક્રં રથાઙ્ગં તસ્યાન્તે નેમિઃ સ્ત્રી સ્યાત્પ્રધિઃ પુમાન્
(૨.૭.૧૦૪૫) પિણ્ડિકા નાભિરક્ષાગ્રકીલકે તુ દ્વયોરણિઃ
(૨.૭.૧૦૪૬) રથગુપ્તિર્વરૂથો ના કૂબરસ્તુ યુગંધરઃ
(૨.૭.૧૦૪૭) અનુકર્ષો દાર્વધઃસ્થં પ્રાસઙ્ગો ના યુગાદ્યુગઃ
(૨.૭.૧૦૪૮) સર્વં સ્યાદ્વાહનં યાનં યુગ્યં પત્રં ચ ધોરણમ્
(૨.૭.૧૦૪૯) પરમ્પરાવાહનં યત્તદ્વૈનીતકમસ્ત્રિયામ્
(૨.૭.૧૦૫૦) આધોરણા હસ્તિપકા હસ્ત્યારોહા નિષાદિનઃ
(૨.૭.૧૦૫૧) નિયન્તા પ્રાજિતા યન્તા સૂતઃ ક્ષત્તા ચ સારથિઃ
(૨.૭.૧૦૫૨) સવ્યેષ્ઠદક્ષિણસ્થૌ ચ સંજ્ઞા રથકુટુમ્બિનઃ
(૨.૭.૧૦૫૩) રથિનઃ સ્યન્દનારોહા અશ્વારોહાસ્તુ સાદિનઃ
(૨.૭.૧૦૫૪) ભટા યોધાશ્ચ યોદ્ધારઃ સેનારક્ષાસ્તુ સૈનિકાઃ
(૨.૭.૧૦૫૫) સેનાયાં સમવેતા યે સૈન્યાસ્તે સૈનિકાશ્ચ તે
(૨.૭.૧૦૫૬) બલિનો યે સહસ્રેણ સાહસ્રાસ્તે સહસ્રિણઃ
(૨.૭.૧૦૫૭) પરિધિસ્થઃ પરિચરઃ સેનાનીર્વાહિનીપતિઃ
(૨.૭.૧૦૫૮) કઞ્ચુકો વારબાણોઽસ્ત્રી યત્તુ મધ્યે સકઞ્ચુકાઃ
(૨.૭.૧૦૫૯) બધ્નન્તિ તત્સારસનમધિકાઙ્ગોઽથ શીર્ષકમ્
(૨.૭.૧૦૬૦) શીર્ષણ્યં ચ શિરસ્ત્રેઽથ તનુત્રં વર્મ દંશનમ્
(૨.૭.૧૦૬૧) ઉરશ્છદઃ કઙ્કટકો જાગરઃ કવચોઽસ્ત્રિયામ્
(૨.૭.૧૦૬૨) આમુક્તઃ પ્રતિમુક્તશ્ચ પિનદ્ધશ્ચાપિનદ્ધવત્
(૨.૭.૧૦૬૩) સંનદ્ધો વર્મિતઃ સજ્જો દંશિતો વ્યૂઢકઙ્કટઃ

(૨.૭.૧૦૬૪)  ત્રિષ્વામુક્તાદયો વર્મભૃતાં કાવચિકં ગણે

(૨.૭.૧૦૬૫)  પદાતિપત્તિપદગપાદાતિકપદાતયઃ

(૨.૭.૧૦૬૬)  પદ્ગશ્ચ પદિકશ્ચાથ પાદાતં પત્તિસંહતિઃ

(૨.૭.૧૦૬૭)  શસ્ત્રાજીવે કાણ્ડપૃષ્ઠાયુધીયાયુધિકાઃ સમાઃ

(૨.૭.૧૦૬૮)  કૃતહસ્તઃ સુપ્રયોગવિશિખઃ કૃતપુઙ્ખવત્

(૨.૭.૧૦૬૯)  અપરાદ્ધપૃષત્કોઽસૌ લક્ષ્યાદ્ધશ્ચ્યુતસાયકઃ

(૨.૭.૧૦૭૦)  ધન્વી ધનુષ્માન્ધાનુષ્કો નિષઙ્ગ્યસ્ત્રી ધનુર્ધરઃ

(૨.૭.૧૦૭૧)  સ્યાત્કાણ્ડવાંસ્તુ કાણ્ડીરઃ શાક્તીકઃ શક્તિહેતિકઃ

(૨.૭.૧૦૭૨)  યાષ્ટીકપારશ્વથિકૌ યષ્ટિપર્શ્વથહેતિકૌ

(૨.૭.૧૦૭૩)  નૈસ્ત્રિંશિકોઽસિહેતિઃ સ્યાત્સમૌ પ્રાસિકકૌન્તિકૌ

(૨.૭.૧૦૭૪)  ચર્મી ફલકપાણિઃ સ્યાત્પતાકી વૈજયન્તિકઃ

(૨.૭.૧૦૭૫)  અનુપ્લવઃ સહાયશ્ચાઽનુચરોઽનુચરોઽભિચરઃ સમાઃ

(૨.૭.૧૦૭૬)  પુરોગાઽગ્રેસરપ્રષ્ઠાઽગ્રતઃસરપુરઃસરાઃ

(૨.૭.૧૦૭૭)  પુરોગમઃ પુરોગામી મન્દગામી તુ મન્થરઃ

(૨.૭.૧૦૭૮)  જઙ્ઘાલોઽતિજવસ્તુલ્યૌ જઙ્ઘાકરિકજાઙ્ઘિકૌ

(૨.૭.૧૦૭૯)  તરસ્વી ત્વરિતો વેગી પ્રજસ્વી જવનો જવઃ

(૨.૭.૧૦૮૦)  જય્યો યઃ શક્યતે જેતું જેયો જેતવ્યમાત્રકે

(૨.૭.૧૦૮૧)  જૈત્રસ્તુ જેતા યો ગચ્છત્યલં વિદ્વિષતઃ પ્રતિ

(૨.૭.૧૦૮૨)  સોઽભ્યમિત્રોઽભ્યમિત્રીયોઽપ્યભ્યમિત્રીણ ઇત્યપિ

(૨.૭.૧૦૮૩)  ઊર્જસ્વલઃ સ્યાદૂર્જસ્વી ય ઊર્જોઽતિશયાન્વિતઃ

(૨.૭.૧૦૮૪)  સ્વાદુરસ્વાનુરસિલો રથિકો રથિરો રથી

(૨.૭.૧૦૮૫)  કામગામ્યનુકામીનો હ્યત્યન્તીનસ્તથા ભૃશમ્

(૨.૭.૧૦૮૬)  શૂરો વીરશ્ચ વિક્રાન્તો જેતા જિષ્ણુશ્ચ જિત્વરઃ

(૨.૭.૧૦૮૭)  સાંયુગીનો રણે સાધુઃ શસ્ત્રજીવાઽઽદયસ્ત્રિષુ

(૨.૭.૧૦૮૮)  ધ્વજિની વાહિની સેના પૃતનાઽનીકિની ચમૂઃ

(૨.૭.૧૦૮૯)  વરૂથિની બલં સૈન્યં ચક્રં ચાઽનીકમસ્ત્રિયામ્

(૨.૭.૧૦૯૦)  વ્યૂહસ્તુ બલવિન્યાસો ભેદાદણ્ડાઽઽદયો યુધિ

(૨.૭.૧૦૯૧)  પ્રત્યાસારો વ્યૂહપાર્ષ્ણિઃ સૈન્યપૃષ્ઠે પ્રતિગ્રહઃ

(૨.૭.૧૦૯૨)  એકેભૈકરથા ત્ર્યશ્વા પત્તિઃ પઞ્ચપદાતિકા

(૨.૭.૧૦૯૩)  પત્ત્યઙ્ગૈસ્ત્રિગુણૈઃ સર્વૈઃ ક્રમાદાખ્યા યથોત્તરમ્

(૨.૭.૧૦૯૪)  સેનામુખં ગુલ્મગણૌ વાહિની પૃતના ચમૂઃ

(૨.૭.૧૦૯૫)  અનીકિની દશાઽનીકિન્યક્ષૌહિણ્યથ સંપદિ

(૨.૭.૧૦૯૬) સંપત્તિઃ શ્રીશ્ચ લક્ષ્મીશ્ચ વિપત્ત્યાં વિપદાપદૌ

(૨.૭.૧૦૯૭) આયુધં તુ પ્રહરણં શસ્ત્રમસ્ત્રમથાઽસ્ત્રિયૌ

(૨.૭.૧૦૯૮) ધનુશ્ચાપૌ ધન્વશરાસનકોદણ્ડકાર્મુકમ્

(૨.૭.૧૦૯૯) ઇષ્વાસોઽપ્યથ કર્ણસ્ય કાલપૃષ્ઠં શરાસનમ્

(૨.૭.૧૧૦૦) કપિધ્વજસ્ય ગાણ્ડીવગાણ્ડિવૌ પુંનપુંસકૌ

(૨.૭.૧૧૦૧) કોટિરસ્યાઽટની ગોધાતલે જ્યાઘાતવારણે

(૨.૭.૧૧૦૨) લસ્તકસ્તુ ધનુર્મધ્યં મોર્વી જ્યા શિઞ્જિની ગુણઃ

(૨.૭.૧૧૦૩) સ્યાત્પ્રત્યાલીઢમાલીઢમિત્યાદિ સ્થાનપઞ્ચકમ્

(૨.૭.૧૧૦૪) લક્ષ્યં લક્ષં શરવ્યં ચ શરાભ્યાસ ઉપાસનમ્

(૨.૭.૧૧૦૫) પૃષત્કબાણવિશિખા અજિહ્મગખગાઽઽશુગાઃ

(૨.૭.૧૧૦૬) કલમ્બમાર્ગણશરાઃ પત્રી રોપ ઇષુર્દ્વયોઃ

(૨.૭.૧૧૦૭) પ્રક્ષ્વેડનાસ્તુ નારાચાઃ પક્ષો વાજસ્ત્રિષૂત્તરે

(૨.૭.૧૧૦૮) નિરસ્તઃ પ્રહિતે બાણે વિષાઽક્તે દિગ્ધલિપ્તકૌ

(૨.૭.૧૧૦૯) તૂણોપાસઙ્ગતૂણીરનિષઙ્ગા ઇષુધિર્દ્વયોઃ

(૨.૭.૧૧૧૦) તૂણ્યાં ખડ્ગે તુ નિસ્ત્રિંશચન્દ્રહાસાઽસિરિષ્ટયઃ

(૨.૭.૧૧૧૧) કૌક્ષેયકો મણ્ડલાગ્રઃ કરવાલઃ કૃપાણવત્

(૨.૭.૧૧૧૨) ત્સરુઃ ખડ્ગાદિમુષ્ટૌ સ્યાન્મેખલા તન્નિબન્ધનમ્

(૨.૭.૧૧૧૩) ફલકોઽસ્ત્રી ફલં ચર્મ સંગ્રાહો મુષ્ટિરસ્ય યઃ

(૨.૭.૧૧૧૪) દ્રુઘણો મુદ્ગરઘનૌ સ્યાદીલી કરવાલિકા

(૨.૭.૧૧૧૫) ભિન્દિપાલઃ સૃગસ્તુલ્યૌ પરિઘઃ પરિઘાતિનઃ

(૨.૭.૧૧૧૬) દ્વયોઃ કુઠારઃ સ્વધિતિઃ પરશુશ્ચ પરશ્વધઃ

(૨.૭.૧૧૧૭) સ્યાચ્છસ્ત્રી ચાઽસિપુત્રી ચ છુરિકા ચાઽસિધેનુકા

(૨.૭.૧૧૧૮) વા પુંસિ શલ્યં શઙ્કુર્ના સર્વલા તોમરોઽસ્ત્રિયામ્

(૨.૭.૧૧૧૯) પ્રાસસ્તુ કુન્તઃ કોણસ્તુ સ્ત્રિયઃ પાલ્યશ્રિકોટયઃ

(૨.૭.૧૧૨૦) સર્વાભિસારઃ સર્વૌઘઃ સર્વસન્નહનાર્થકઃ

(૨.૭.૧૧૨૧) લોહાભિસારોઽસ્ત્રભૃતાં રાજ્ઞાનાં નીરાજનાવિધિઃ

(૨.૭.૧૧૨૨) યત્સેનયાઽભિગમનમરૌ તદભિષેણનમ્

(૨.૭.૧૧૨૩) યાત્રા વ્રજ્યાઽભિનિર્યાણં પ્રસ્થાનં ગમનં ગમઃ

(૨.૭.૧૧૨૪) સ્યાદાસારઃ પ્રસરણં પ્રચક્રં ચલિતાર્થકમ્

(૨.૭.૧૧૨૫) અહિતાન્પ્રત્યભીતસ્ય રણે યાનમભિક્રમઃ

(૨.૭.૧૧૨૬) વૈતાલિકા બોધકરાશ્ચાક્રિકા ઘાણ્ટિકાર્થકાઃ

(૨.૭.૧૧૨૭) સ્યુર્માગધાસ્તુ મગધા બન્દિનઃ સ્તુતિપાઠકાઃ

(૨.૭.૧૧૨૮) સંશમકાસ્તુ સમયાત્ સંગ્રામાદનિવર્તિનઃ
(૨.૭.૧૧૨૯) રેણુર્દ્વયોઃ સ્ત્રિયાં ધૂલિઃ પાંસુર્ના ન દ્વયો રજઃ
(૨.૭.૧૧૩૦) ચૂર્ણે ક્ષોદઃ સમુત્પિઞ્જપિઞ્જલૌ ભૃશમાકુલે
(૨.૭.૧૧૩૧) પતાકા વૈજયન્તી સ્યાત્કેતનં ધ્વજમસ્ત્રિયામ્
(૨.૭.૧૧૩૨) સા વીરાશંસનં યુદ્ધભૂમિર્યાઽતિભયપ્રદા
(૨.૭.૧૧૩૩) અહં પૂર્વમહં પૂર્વમિત્યહંપૂર્વિકા સ્ત્રિયામ્
(૨.૭.૧૧૩૪) આહોપુરુષિકા દર્પાદ્યા સ્યાત્સંભાવનાઽઽત્મનિ
(૨.૭.૧૧૩૫) અહમહમિકા તુ સા સ્યાત્ પરસ્પરં યો ભવત્યહઙ્કારઃ
(૨.૭.૧૧૩૬) દ્રવિણં તરઃ સહોબલશૌર્યાણિ સ્થામ શુષ્મં ચ
(૨.૭.૧૧૩૭) શક્તિઃ પરાક્રમઃ પ્રાણો વિક્રમસ્ત્વતિશક્તિતા
(૨.૭.૧૧૩૮) વીરપાણં તુ યત્પાનં વૃત્તે ભાવિનિ વા રણે
(૨.૭.૧૧૩૯) યુદ્ધમાયોધનં જન્યં પ્રધનં પ્રવિદારણમ્
(૨.૭.૧૧૪૦) મૃધમાસ્કન્દનં સંખ્યં સમીકં સાંપરાયિકમ્
(૨.૭.૧૧૪૧) અસ્ત્રિયાં સમરાઽનીકરણાઃ કલહવિગ્રહૌ
(૨.૭.૧૧૪૨) સંપ્રહારાઽભિસંપાત કલિસંસ્ફોટ સંયુગાઃ
(૨.૭.૧૧૪૩) અભ્યામર્દ સમાઘાત સંગ્રામાઽભ્યાગમાઽઽહવાઃ
(૨.૭.૧૧૪૪) સમુદાયઃ સ્ત્રિયઃ સંયત્સમિત્યાઽઽજિસમિદ્યુધઃ
(૨.૭.૧૧૪૫) નિયુદ્ધં બાહુયુદ્ધેઽથ તુમુલં રણસંકુલે
(૨.૭.૧૧૪૬) ક્ષ્વેદા તુ સિંહનાદઃ સ્યાત્ કરિણાં ઘટના ઘટા
(૨.૭.૧૧૪૭) ક્રંદનં યોધસંરાવો બૃંહિતં કરિગજિત્ઋતમ્
(૨.૭.૧૧૪૮) વિસ્ફારો ધનુષઃ સ્વાનઃ પતાહાઽઽદમ્બરઓ સમૌ
(૨.૭.૧૧૪૯) પ્રસભં તુ બલાત્કારો હઠોઽથ સ્ખલિતં છલમ્
(૨.૭.૧૧૫૦) અજન્યં ક્લીબમુત્પાત ઉપસગઋઃ સમં ત્રયમ્
(૨.૭.૧૧૫૧) મૂછાઋ તુ કશ્મલં મોહો।આપ્યવમદઋસ્તુ પીદનમ્
(૨.૭.૧૧૫૨) અભ્યવસ્કન્દનં ત્વભ્યાસાદનં વિજયો જયઃ
(૨.૭.૧૧૫૩) વૈરશુદ્ધિઃ પ્રતીકારો વૈરનિયઋઆતનં ચ સા
(૨.૭.૧૧૫૪) પ્રદ્રાવોદ્દ્રાવસંદ્રાવ સંદાવા વિદ્રવો દ્રવઃ
(૨.૭.૧૧૫૫) અપક્રમોઽપયાનં ચ રણે ભંગઃ પરાજયઃ
(૨.૭.૧૧૫૬) પરાજિતપરાભૂતૌ ત્રિષુ નષ્ટતિરોહિતૌ
(૨.૭.૧૧૫૭) પ્રમાપણં નિબહઋણં નિકારણં વિશારણમ્
(૨.૭.૧૧૫૮) પ્રવાસનં પરાસનં નિષૂદનં નિહિંસનમ્
(૨.૭.૧૧૫૯) નિવાઋસનં સંજ્ઞપનં નિગઋન્થનમપાસનમ્

(૨.૭.૧૧૬૦) નિસ્તહત્રઋણં નિહનનં ક્ષણનં પરિવજત્રઋનમ્
(૨.૭.૧૧૬૧) નિવાત્રઋપણં વિશસનં મારણં પ્રતિઘાતનમ્
(૨.૭.૧૧૬૨) ઉદ્વાસન પ્રમથન ક્રથનોજ્જાસનાનિ ચ
(૨.૭.૧૧૬૩) આલમ્ભપિઞ્જવિશરઘાતોન્માથવધા અપિ
(૨.૭.૧૧૬૪) સ્યાત્ પઞ્ચતા કાલધર્મો દિષ્ટાન્તઃ પ્રલયોઽત્યયઃ
(૨.૭.૧૧૬૫) અન્તો નાશો દ્વયોર્મૃત્યુર્મરણં નિધનોઽસ્ત્રિયામ્
(૨.૭.૧૧૬૬) પરાસુપ્રાપ્તપંચત્વપરેતપ્રેતસંસ્થિતાઃ
(૨.૭.૧૧૬૭) મૃતપ્રમીતૌ ત્રિષ્વેતે, ચિતા ચિત્યા ચિતિઃ સ્ત્રિયામ્
(૨.૭.૧૧૬૮) કબંધોઽસ્ત્રી ક્રિયા યુક્તમપમૂર્ધકલેવરમ્
(૨.૭.૧૧૬૯) શ્મશાનં સ્યાત્ પિતૃવનં કુણપઃ શવમસ્ત્રિયામ્
(૨.૭.૧૧૭૦) પ્રગ્રહોપગ્રહૌ બંદ્યાં, કારા સ્યાત્ બંધનાલયે
(૨.૭.૧૧૭૧) પૂંસિ ભૂગ્ન્યસવઃ પ્રાણાશ્ચૈવં, જીવોઽસુધારણમ્
(૨.૭.૧૧૭૨) આયુર્જીવિતકાલો, ના જીવતુર્જીવનૌષધમ્ । ઇતિ ક્ષત્રિયવર્ગઃ

## વૈશ્યવર્ગઃ ।

(૨.૮.૧૧૭૩) ઊરવ્ય ઊરુજ અર્યા વૈશ્યા ભૂમિસ્પૃશો વિશઃ । અથ વૈશ્યવર્ગઃ
(૨.૮.૧૧૭૪) આજીવો જીવિકા વાતાત્રઋ વૃત્તિર્વતત્રઋનજીવને
(૨.૮.૧૧૭૫) સ્ત્રિયાં કૃષિઃ પાશુપાલ્યં વાણિજ્યં ચેતિ વૃત્તયઃ
(૨.૮.૧૧૭૬) સેવા શ્વવૃત્તિરનૃતં કૃશિરુઞ્છશિલં ત્વૃતમ્
(૨.૮.૧૧૭૭) દ્વે યાચિતાડયાચિતયોર્યથાસંખ્યં મૃતાડમૃતે
(૨.૮.૧૧૭૮) સત્યાનૃતં વણિગ્ભાવઃ, સ્યાદૃણં પયુત્રઋદઞ્ચનમ્
(૨.૮.૧૧૭૯) ઉદ્ધારોઽથત્રઋપ્રયોગસ્તુ કુસીદં વૃદ્ધિજીવિકા
(૨.૮.૧૧૮૦) યાઞ્ચયાઽઽપ્તં યાચિતકં નિમયાદાપમિત્યકમ્
(૨.૮.૧૧૮૧) ઉત્તમણાત્રઋડધમણૌત્રઋ દ્વૌ પ્રયોક્તૃ ગ્રાહકૌ ક્રમાત્
(૨.૮.૧૧૮૨) કુસીદિકો વાધુત્રઋષિકો વૃદ્ધ્યાજીવશ્ચ વાર્ધુષિઃ
(૨.૮.૧૧૮૩) ક્ષેત્રાજીવઃ કષત્રઋકશ્ચ કૃષિકશ્ચ કૃષીવલઃ
(૨.૮.૧૧૮૪) ક્ષેત્રં વ્રૈહેયશાલેયં વ્રીહિશાલ્યુદ્ભવોચિતમ્
(૨.૮.૧૧૮૫) યવ્યં યવક્યં યષ્ટિક્યં યવાઽઽદિભવનં હિ યત્
(૨.૮.૧૧૮૬) તિલ્યતૈલીનવન્ માષોમાઽણુભઙ્ગાદ્વિરૂપતા
(૨.૮.૧૧૮૭) મૌદ્ગીનકૌદ્રવીણાઽઽદિ શેષધાન્યોદ્ભવક્ષમમ્
(૨.૮.૧૧૮૮) શાકક્ષેત્રાઽઽદિકે શાકશાકતં શાકશાકિનમ્

(૨.૮.૧૧૮૯) બીજાકૃતં તૂપ્રકૃષ્ટે સીત્યં કૃષ્ટં ચ હલ્યવત્

(૨.૮.૧૧૯૦) ત્રિગુણાકૃતં તૃતીયાકૃતં ત્રિહલ્યં ત્રિસીત્યમપિ તસ્મિન્

(૨.૮.૧૧૯૧) દ્વિગુણાકૃતે તુ સવઋ પૂવઋ શમ્બાકૃતમપીહ

(૨.૮.૧૧૯૨) દ્રોણાઽઽઢકાઽઽદિ વાપાઽઽદૌ દ્રૌણિકાઽઽઢકિકાઽઽદયઃ

(૨.૮.૧૧૯૩) ખ઼્હરીવાપસ્તુ ખારીક ઉત્તમણાઋઽઽદયસ્ત્રિષુ

(૨.૮.૧૧૯૪) પુન્નપુંસકયોર્વપ્રઃ કેદારઃ ક્ષેત્રમસ્ય તુ

(૨.૮.૧૧૯૫) કૈદારકં સ્યાત્ કૈદાયઋ ક્ષેત્રં કૈદારિકં ગણે

(૨.૮.૧૧૯૬) લોષ્ટાનિ લેષ્ટવઃ પુંસિ કોટિશો લોષ્ટભેદનઃ

(૨.૮.૧૧૯૭) પ્રાજનં તોદનં તોત્રં ખનિત્રમવદારણે

(૨.૮.૧૧૯૮) દાત્રં લવિત્રમાબન્ધો યોત્રં યોક્ત્રમથો ફલમ્

(૨.૮.૧૧૯૯) નિરીષં કુટકં ફાલઃ કૃષકો લાંગલં હલમ્

(૨.૮.૧૨૦૦) ગોદારણં ચ સીરોઽથ શમ્યા સ્ત્રી યુગકીલકઃ

(૨.૮.૧૨૦૧) ઈષ લાંગલદંડઃ સ્યાત્ સીત લાઙ્ગલપદ્ધતિઃ

(૨.૮.૧૨૦૨) પુંસિ મેધિઃ ખલે દારુ ન્યસ્તં યત્ પશુબન્ધને

(૨.૮.૧૨૦૩) આશુર્વ્રીહિઃ પાટલઃ સ્યાચ્છિતશૂકયવૌ સમૌ

(૨.૮.૧૨૦૪) તોક્મસ્તુ તત્ર હરિતે કલાયસ્તુ સતીનકઃ

(૨.૮.૧૨૦૫) હરેણુરેણુકૌ ચાઽસ્મિન્ કોરદૂષસ્તુ કોદ્રવઃ

(૨.૮.૧૨૦૬) મંગલ્યકો મસૂરોઽથ મકુષ્ઠક મયુષ્ઠકૌ

(૨.૮.૧૨૦૭) વનમુદ્ગે સષઋપે તુ દ્વૌ તંતુભકદમ્બકૌ

(૨.૮.૧૨૦૮) સિદ્ધાર્થસ્ત્વેષ ધવલો ગોધૂમઃ સુમનઃ સમૌ

(૨.૮.૧૨૦૯) સ્યાદ્ યાવકસ્તુ કુલ્માષશ્ચણકો હરિમન્થકઃ

(૨.૮.૧૨૧૦) દ્વૌ તિલે તિલપેજશ્ચ તિલપિઞ્જશ્ચ નિષ્ફલે

(૨.૮.૧૨૧૧) ક્ષવઃ ક્ષુતાભિજનનો રાજિકા કૃષ્ણિકાઽઽસુરી

(૨.૮.૧૨૧૨) સ્ત્રિયૌ કઙ્ગુપ્રિયઙ્ગૂ દ્વે અતસી સ્યાદુમા ક્ષુમા

(૨.૮.૧૨૧૩) માતુલાની તુ ભઙ્ગાયાં વ્રીહિ ભેદસ્ત્વણુઃ પુમાન્

(૨.૮.૧૨૧૪) કિંશારુઃ સસ્યશૂકં સ્યાત્ કણિશં સસ્યમઞ્જરી

(૨.૮.૧૨૧૫) ધાન્યં વ્રીહિઃ સ્તમ્બકરિઃ સ્તમ્બો ગુચ્છસ્તૃણાદિનઃ

(૨.૮.૧૨૧૬) નાડી નાલં ચ કાણ્ડોઽસ્ય પલાલોસ્ત્રી સ નિષ્ફલઃ

(૨.૮.૧૨૧૭) કડઙ્ગરો બુસં ક્લીબે ધાન્યત્વચિ તુષઃ પુમાન્

(૨.૮.૧૨૧૮) શૂકોઽસ્ત્રી શ્લક્ષ્ણતીક્ષ્ણાઽગ્રે શમી શિમ્બા ત્રિષૂત્તરે

(૨.૮.૧૨૧૯) ઋદ્ધમાવસિતં ધાન્યં પૂતં તુ બહુલીકૃતમ્

(૨.૮.૧૨૨૦) માષાઽઽદયઃ શમીધાન્યે શૂકધાન્યે યવાઽઽદયઃ

(૨.૮.૧૨૨૧) શાલયઃ કલમાદ્યાશ્ચ ષષ્ટિકાદ્યાશ્ચ પુંસ્યમી
(૨.૮.૧૨૨૨) તૃણધાન્યાનિ નીવારાઃ સ્ત્રી ગવેધુર્ગવેધુકા
(૨.૮.૧૨૨૩) અયોગ્રં મુસલોઽસ્ત્રી સ્યાદુદૂખલમુલૂખલમ્
(૨.૮.૧૨૨૪) પ્રસ્ફોટનં શૂપત્રૂમસ્ત્રી ચાલની તિતઉઃ પુમાન્
(૨.૮.૧૨૨૫) સ્યૂતપ્રસેવૌ કણ્ડોલપિટૌ કટકિલિઞ્જકૌ
(૨.૮.૧૨૨૬) સમાનૌ રસવત્યાં તુ પાકસ્થાનમહાનસે
(૨.૮.૧૨૨૭) પૌરોગવસ્તદધ્યક્ષઃ સૂપકારાસ્તુ બલ્લવાઃ
(૨.૮.૧૨૨૮) આરાલિકા આન્ધસિકાઃ સૂદા ઔદનિકા ગુણાઃ
(૨.૮.૧૨૨૯) આપૂપિકઃ કાન્દવિકો ભક્ષ્યકાર ઇમે ત્રિષુ
(૨.૮.૧૨૩૦) અશ્મન્તમુદ્ધાનમધિશ્રયણી ચુલ્લિરન્તિકા
(૨.૮.૧૨૩૧) અઙ્ગારધાનિકા।આંગારશકટ્યપિ હસન્ત્યપિ
(૨.૮.૧૨૩૨) હસન્યપ્યથ ન સ્ત્રી સ્યાદઙ્ગારોઽલાતમુલ્મુકમ્
(૨.૮.૧૨૩૩) ક્લીબેઽમ્બરીપં ભ્રાષ્ટ્રો ના કન્દુર્વા સ્વેદની સ્ત્રિયામ્
(૨.૮.૧૨૩૪) અલિઞ્જરઃ સ્યાન્મણિકં કકત્રૂય્યત્રૂલુર્ગલન્તિકા
(૨.૮.૧૨૩૫) પિઠરઃ સ્થાલ્યુખા કુણ્ડં કલશસ્તુ ત્રિષુ દ્વયોઃ
(૨.૮.૧૨૩૬) ઘટઃ કુટનિપાવસ્ત્રી શરાવો વધત્રૂમાનકઃ
(૨.૮.૧૨૩૭) ત્રૂજીષં પિષ્ટપચનં કંસોઽસ્ત્રી પાનભાજનમ્
(૨.૮.૧૨૩૮) કુતૂઃ કૃત્તેઃ સ્નેહપાત્રં સૈવાઽલ્પા કુતુપઃ પુમાન્
(૨.૮.૧૨૩૯) સવત્રૂમાવપનં ભાણ્ડં પાત્રામત્રે ચ ભાજનમ્
(૨.૮.૧૨૪૦) દવિત્રૂઃ કમ્બિઃ ખજાકા ચ સ્યાત્ તર્દૂર્દારુહસ્તકઃ
(૨.૮.૧૨૪૧) અસ્ત્રી શાકં હરિતકં શિગ્રુરસ્ય તુ નાડિકા
(૨.૮.૧૨૪૨) કલમ્બશ્ચ કદમ્બશ્ચ વેષવાર ઉપસ્કરઃ
(૨.૮.૧૨૪૩) તિન્તિડીકં ચ ચુક્રં ચ વૃક્ષામ્લમથ વેલ્લજમ્
(૨.૮.૧૨૪૪) મરીચં કોલકં કૃષ્ણભૂષણં ધમત્રૂપત્તનમ્
(૨.૮.૧૨૪૫) જીરકો જરણોઽજાજિ કણાઃ કૃષ્ણે તુ જીરકે
(૨.૮.૧૨૪૬) સુષવી કારવી પૃથ્વી પૃથુઃ કાલોપકુઞ્જિકા
(૨.૮.૧૨૪૭) આર્દ્રકં શૃઙ્ગબેરં સ્યાદથ છત્રા વિતુન્નકમ્
(૨.૮.૧૨૪૮) કુસ્તુમ્બરુ ચ ધાન્યાકમથ શુણ્ઠી મહૌષધમ્
(૨.૮.૧૨૪૯) સ્ત્રીનપુંસકયોર્વિશ્વં નાગરં વિશ્વભેષજમ્
(૨.૮.૧૨૫૦) આરનાલકસૌવીરકુલ્માષઽભિશુતાનિ ચ
(૨.૮.૧૨૫૧) અવન્તિસોમધાન્યામ્લકુઞ્જલાનિ ચ કાઞ્જિકે
(૨.૮.૧૨૫૨) સહસ્રવેધિ જતુકં બલ્હીકં હિઙ્ગુ રામઠમ્

(૨.૮.૧૨૫૩) તત્પત્રી કારવી પૃથ્વી બાષ્પિકા કબરી પૃથુઃ

(૨.૮.૧૨૫૪) નિશાऽऽખ્યા કાઞ્ચની પીતા હરિદ્રા વરવણિર્ન્નીની

(૨.૮.૧૨૫૫) સામુદ્રં યત્ તુ લવણમક્ષીવં વશિરં ચ તત્

(૨.૮.૧૨૫૬) સૈન્ધવોऽસ્ત્રી શીતશિવં માણિમન્થં ચ સિન્ધુજે

(૨.૮.૧૨૫૭) રૌમકં વસુકં પાક્યં બિડં ચ કૃતકે દ્વયમ્

(૨.૮.૧૨૫૮) સૌવર્ચલેऽક્ષરુચકે તિલકં તત્ર મેચકે

(૨.૮.૧૨૫૯) મત્સ્યણ્ડી ફાણિતં ખણ્ડવિકારે શર્કરા સિતા

(૨.૮.૧૨૬૦) કૂર્ચિકા ક્ષીરવિકૃતિઃ સ્યાદ્રસાલા તુ માર્જિતા

(૨.૮.૧૨૬૧) સ્યાત્તેમનં તુ નિષ્ઠાનં ત્રિલિઙ્ગા વાસિતાऽવધેઃ

(૨.૮.૧૨૬૨) શૂલાકૃતં ભટિત્રં ચ શૂલ્યમુખ્યં તુ પૈઠરમ્

(૨.૮.૧૨૬૩) પ્રણીતમુપસમ્પન્નં પ્રયસ્તં સ્યાત્સુસંસ્કૃતમ્

(૨.૮.૧૨૬૪) સ્યાત્પિચ્છિલં તુ વિજિલં સંમૃષ્ટં શોધિતં સમે

(૨.૮.૧૨૬૫) ચિક્કણં મસૃણં સ્નિગ્ધં તુલ્યે ભાવિતવાસિતે

(૨.૮.૧૨૬૬) આપક્વં પૌલિરભ્યૂષો લાજાઃ પુંભૂમ્નિ ચાऽક્ષતાઃ

(૨.૮.૧૨૬૭) પૃથકઃ સ્યાચ્ચિપિટકો ધાના ભૃષ્ટયવે સ્ત્રિયઃ

(૨.૮.૧૨૬૮) પૂપોऽપૂપઃ પિષ્ટકઃ સ્યાત્કરમ્ભો દધિસક્તવઃ

(૨.૮.૧૨૬૯) ભિસ્સા સ્ત્રી ભક્તમન્ધોऽન્નમોદનોऽસ્ત્રી સ દીદિવિઃ

(૨.૮.૧૨૭૦) ભિસ્સટા દગ્ધિકા સર્વરસાऽગ્રે મણ્ડમસ્ત્રિયામ્

(૨.૮.૧૨૭૧) માસરાऽऽચામનિસ્રાવા મણ્ડે ભક્તસમુદ્ભવે

(૨.૮.૧૨૭૨) યવાગૂરુષ્ણિકા શ્રાણા વિલેપી તરલા ચ સા

(૨.૮.૧૨૭૩) મ્રક્ષણાऽભ્યઞ્જને તૈલં કૃસરસ્તુ તિલૌદનઃ

(૨.૮.૧૨૭૪) ગવ્યં ત્રિષુ ગવાં સર્વં ગોવિડ્ગોમયસ્ત્રિયામ્

(૨.૮.૧૨૭૫) તત્તુ શુષ્કં કરીષોऽસ્ત્રી દુગ્ધં ક્ષીરં પયસ્સમમ્

(૨.૮.૧૨૭૬) પયસ્યમાજ્યદધ્યાऽऽદિ ત્રપ્સ્યં દધિ ઘનેતરત્

(૨.૮.૧૨૭૭) ઘૃતમાજ્યં હવિઃ સર્પિર્નવનીતં નવોદ્ધૃતમ્

(૨.૮.૧૨૭૮) તત્તુ હૈયઙ્ગવીનં યત્ હ્યોઘોદોહોદ્ભવં ગૃતમ્

(૨.૮.૧૨૭૯) દણ્ડાહતં કાલશેયમરિષ્ટમપિ ગોરસઃ

(૨.૮.૧૨૮૦) તક્રં હ્યુદશ્વિન્ મથિતં પાદામ્બ્વર્ધામ્બુ નિર્જલમ્

(૨.૮.૧૨૮૧) મણ્ડમ્ દધિભવં મસ્તુ પીયૂષોऽભિનવં પયઃ

(૨.૮.૧૨૮૨) અશનાયા બુભુક્ષા ક્ષુદ્ ગ્રાસસ્તુ કવલઃ પુમાન્

(૨.૮.૧૨૮૩) સપીતિઃ સ્ત્રી તુલ્યપાનં સગ્ધિઃ સ્ત્રી સહભોજનમ્

(૨.૮.૧૨૮૪) ઉદન્યા તુ પિપાસા તૃટ્ તર્પો જગ્ધિસ્તુ ભોજનમ્

(૨.૮.૧૨૮૫) જેમનં લેહ આહારો નિઘાસો ન્યાદ ઇત્યપિ

(૨.૮.૧૨૮૬) સૌહિત્યં તર્પણં તૃપ્તિઃ ફેલા ભુક્તસમુજ્ઝિતમ્

(૨.૮.૧૨૮૭) કામં પ્રકામં પર્યાપ્તં નિકામેષ્ટં યથેપ્સિતમ્

(૨.૮.૧૨૮૮) ગોપે ગોપાલ ગોસંખ્ય ગોધુગાભીર વલ્લવાઃ

(૨.૮.૧૨૮૯) ગોમહિષ્યાઽઽદિકં પાદબન્ધનં દ્વૌ ગવીશ્વરે

(૨.૮.૧૨૯૦) ગોમાન્ ગોમી ગોકુલં તુ ગોધનં સ્યાત્ગવાં વ્રજે

(૨.૮.૧૨૯૧) ત્રિષ્વાશિતંગવીનં તદ્ગાવો યત્રાઽશિતાઃ પુરા

(૨.૮.૧૨૯૨) ઉક્ષા ભદ્રો બલીવર્દ ઋષભો વૃષભો વૃષઃ

(૨.૮.૧૨૯૩) અનડ્વાન્ સૌરભેયો ગૌરુક્ષણાં સંહતિરૌક્ષકમ્

(૨.૮.૧૨૯૪) ગવ્યા ગોત્રા ગવાં વત્સધેન્વોર્વાત્સકધૈનુકે

(૨.૮.૧૨૯૫) ઉક્ષા મહાન્ મહોક્ષઃ સ્યાદ્વૃદ્ધોક્ષસ્તુ જરદ્ગવઃ

(૨.૮.૧૨૯૬) ઉત્પન્ન ઉક્ષા જાતોક્ષઃ સદ્યો જાતસ્તુ તર્ણકઃ

(૨.૮.૧૨૯૭) શકૃત્કરિસ્તુ વત્સસ્યાદ્ દમ્યવત્સતરૌ સમૌ

(૨.૮.૧૨૯૮) આર્ષભ્યઃ ષણ્ડતાયોગ્યઃ ષણ્ડો ગોપતિરિટ્ચરઃ

(૨.૮.૧૨૯૯) સ્કન્ધદેશે સ્વસ્ય વહઃ સાસ્ના તુ ગલકમ્બલઃ

(૨.૮.૧૩૦૦) સ્યાન્નસ્તિતસ્તુ નસ્યોતઃ પ્રષ્ઠવાડ્ યુગપાર્શ્વગઃ

(૨.૮.૧૩૦૧) યુગાઽઽદીનાં તુ વોઢારો યુગ્યપ્રાસંગ્યશાકટાઃ

(૨.૮.૧૩૦૨) ખનતિ તેન તદ્વોઢાઽસ્યેદં હાલિકસૈરિકૌ

(૨.૮.૧૩૦૩) ધુર્વહે ધુર્ય ધૌરેય ધુરીણાઃ સધુરન્ધરાઃ

(૨.૮.૧૩૦૪) ઉભાવેકધુરીણૈકધુરાવેકધુરાવહે

(૨.૮.૧૩૦૫) સ તુ સર્વધુરીણઃ સ્યાદ્યો વૈ સર્વધુરાઽઽવહઃ

(૨.૮.૧૩૦૬) માહેયી સૌરભેયી ગૌરુસ્રા માતા ચ શ◌ૃઙ્ગિણી

(૨.૮.૧૩૦૭) અર્જુન્યઘ્ન્યા રોહિણી સ્યાદુત્તમા ગોષુ નૈચિકી

(૨.૮.૧૩૦૮) વર્ણાઽઽદિભેદાત્સંજ્ઞાઃ સ્યુઃ શબલીધવલાઽઽદયઃ

(૨.૮.૧૩૦૯) દ્વિહાયની દ્વિવર્ષા ગૌરેકાઽબ્દા ત્વેકહાયની

(૨.૮.૧૩૧૦) ચતુરબ્દા ચતુર્હાણ્યેવં ત્ર્યબ્દા ત્રિહાયણી

(૨.૮.૧૩૧૧) વશા વન્ધ્યાઽવતોકા તુ સ્રવદ્ગર્ભાઽથ સંધિની

(૨.૮.૧૩૧૨) આક્રાન્તા વૃષભેણાથ વેહદ્ ગર્ભોપઘાતિની

(૨.૮.૧૩૧૩) કાલ્યોપસર્યા પ્રજને પ્રષ્ઠૌહી બાલગર્ભિણી

(૨.૮.૧૩૧૪) સ્યાદચણ્ડી તુ સુકરા બહુસૂતિઃ પરેષ્ટુકા

(૨.૮.૧૩૧૫) ચિરપ્રસૂતા બષ્કયણી ધેનુઃ સ્યાન્નવસૂતિકા

(૨.૮.૧૩૧૬) સુવ્રતા સુખસંદોહ્યા પીનોઘ્ની પીવરસ્તની

(૨.૮.૧૩૧૭) દ્રોણક્ષીરા દ્રોણદુગ્ધા ધેનુષ્યા બન્ધકે સ્થિતા

(૨.૮.૧૩૧૮) સમાંસમીના સા યૈવ પ્રતિવર્ષપ્રસૂતયે

(૨.૮.૧૩૧૯) ઊધસ્તુ ક્લીબમાપીનં સમૌ શિવકકીલકૌ

(૨.૮.૧૩૨૦) ન પુમ્સિ દામ સંદાનં પશુરજ્જુસ્તુ દામની

(૨.૮.૧૩૨૧) વૈશાખમન્થમન્થાન મન્થાનો મન્થદણ્ડકે

(૨.૮.૧૩૨૨) કુઠરો દણ્ડવિષ્કમ્ભો મન્થની ગર્ગરી સમે

(૨.૮.૧૩૨૩) ઉષ્ટ્રે ક્રમેલકમયમહાઙ્ગાઃ કરભઃ શિશુઃ

(૨.૮.૧૩૨૪) કરભાઃ સ્યુઃ શઽ્ઙ્ખલકા દારવૈઃ પાદબન્ધનૈઃ

(૨.૮.૧૩૨૫) અજા ચ્છાગી શુભચ્છાગબસ્તચ્છગલકા અજે

(૨.૮.૧૩૨૬) મેઢ્રોરભ્રોરણોર્ણાયુ મેષ વૃષ્ણય એડકે

(૨.૮.૧૩૨૭) ઉષ્ટ્રોરભ્રાઽજવૃન્દે સ્યાદૌષ્ટ્રકૌરભ્રકાઽઽજકમ્

(૨.૮.૧૩૨૮) ચક્રીવન્તસ્તુ વાલેયા રાસભા ગર્દભાઃ ખરાઃ

(૨.૮.૧૩૨૯) વૈદેહકઃ સાર્થવાહો નૈગમો વાણિજો વણિક્

(૨.૮.૧૩૩૦) પણ્યાજીવો હ્યાપણિકઃ ક્રયવિક્રયિકશ્ચ સઃ

(૨.૮.૧૩૩૧) વિક્રેતા સ્યાદ્વિક્રયિકઃ ક્રાયિકક્રયિકૌ સમૌ

(૨.૮.૧૩૩૨) વાણિજ્યં તુ વણિજ્યા સ્યાન્ મૂલ્યં વસ્નોઽપ્યવક્રયઃ

(૨.૮.૧૩૩૩) નીવી પરિપણો મૂલધનં લાભોઽધિકં ફલમ્

(૨.૮.૧૩૩૪) પરિદાનં પરીવર્તો નૈમેયનિયમાવપિ

(૨.૮.૧૩૩૫) પુમાનુપનિધિર્ન્યાસઃ પ્રતિદાનં તદર્પણમ્

(૨.૮.૧૩૩૬) ક્રયે પ્રસારિતં ક્રય્યં ક્રેયં ક્રેતવ્યમાત્રકે

(૨.૮.૧૩૩૭) વિક્રેયં પણિતવ્યં ચ પણ્યં ક્રય્યાઽઽદયસ્ત્રિષુ

(૨.૮.૧૩૩૮) ક્લીબે સત્યાપનં સત્યઙ્કારઃ સત્યાકૃતિઃ સ્ત્રિયામ્

(૨.૮.૧૩૩૯) વિપણો વિક્રયઃ સંખ્યાઃ સંખ્યેયે હ્યાદશ ત્રિષુ

(૨.૮.૧૩૪૦) વિંશત્યાઽઽદ્યાઃ સદૈકત્વે સર્વાઃ સંખ્યેયસંખ્યયોઃ

(૨.૮.૧૩૪૧) સંખ્યાઽર્થે દ્વિબહુત્વે સ્તસ્તાસુ ચાઽઽનવતેઃ સ્ત્રિયઃ

(૨.૮.૧૩૪૨) પઙ્ક્તેઃ શતસહસ્રાઽઽદિ ક્રમાદ્દશગુણોત્તરમ્

(૨.૮.૧૩૪૩) યૌતવં દ્રુવયં પાય્યમિતિ માનાઽર્થકં ત્રયમ્

(૨.૮.૧૩૪૪) માનં તુલાઙ્ગુલિપ્રસ્થૈર્ગુઞ્જાઃ પઞ્જાઽઽદ્યમાષકઃ

(૨.૮.૧૩૪૫) તે ષોડશાઽક્ષઃ કર્ષોઽસ્ત્રી પલં કર્ષચતુષ્ટયમ્

(૨.૮.૧૩૪૬) સુવર્ણબિસ્તૌ હેમ્નોઽક્ષે કુરુબિસ્તસ્તુ તત્પલે

(૨.૮.૧૩૪૭) તુલા સ્ત્રિયાં પલશતં ભારઃ સ્યાદ્વિંશતિસ્તુલાઃ

(૨.૮.૧૩૪૮) આચિતો દશ ભારાઃ સ્યુઃ શાકટો ભાર આચિતઃ

(૨.૮.૧૩૪૯)  કાર્ષાપણઃ કાર્ષિકઃ સ્યાત્  કાર્ષિકે તામ્રિકે પણઃ

(૨.૮.૧૩૫૦)  અસ્ત્રિયામાઢકદ્રોણૌ ખારી વાહો નિકુઞ્ચકઃ

(૨.૮.૧૩૫૧)  કુડવઃ પ્રસ્થ ઇત્યાઽઽદ્યાઃ પરિમાણાઽર્થકાઃ પૃથક્

(૨.૮.૧૩૫૨)  પાદસ્તુરીયો ભાગઃ સ્યાદંશભાગૌ તુ વણ્ટકે

(૨.૮.૧૩૫૩)  દ્રવ્યં વિત્તં સ્વાપતેયં રિક્થમૃક્થં ધનં વસુ

(૨.૮.૧૩૫૪)  હિરણ્યં દ્રવિણં દ્યુમ્નમર્થરૈવિભવા અપિ

(૨.૮.૧૩૫૫)  સ્યાત્કોશશ્ચ હિરણ્યં ચ હેમરૂપ્યે કૃતાઽકૃતે

(૨.૮.૧૩૫૬)  તાભ્યાં યદન્યત્ તત્કુપ્યં રૂપ્યં તદ્ દ્વયમાહતમ્

(૨.૮.૧૩૫૭)  ગારુત્મતં મરકતમશ્મગર્ભો હરિન્મણિઃ

(૨.૮.૧૩૫૮)  શોણરત્નં લોહિતકઃ પદ્મરાગોઽથ મૌક્તિકમ્

(૨.૮.૧૩૫૯)  મુક્તાઽથ વિદ્રુમઃ પુંસિ પ્રવાલં પુન્નપુંસકમ્

(૨.૮.૧૩૬૦)  રત્નં મણિર્દ્વયોરશ્મજાતૌ મુક્તાઽઽદિકેઽપિ ચ

(૨.૮.૧૩૬૧)  સ્વર્ણં સુવર્ણં કનકં હિરણ્યં હેમકાટકમ્

(૨.૮.૧૩૬૨)  તપનીયં શાતકુમ્ભં ગાઙ્ગેયં  ભર્મ કર્વુરમ્

(૨.૮.૧૩૬૩)  ચામીકરં જાતરૂપં મહારજતકાઞ્ચને

(૨.૮.૧૩૬૪)  રુક્મં કાર્તસ્વરં જામ્બૂનદમષ્ટાપદોઽસ્ત્રિયામ્

(૨.૮.૧૩૬૫)  અલઙ્કારસુવર્ણં યચ્છૃઙ્ગીકનકમિત્યદઃ

(૨.૮.૧૩૬૬)  દુર્વર્ણં રજતં રૂપ્યં ખર્જૂરં શ્વેતમિત્યપિ

(૨.૮.૧૩૬૭)  રીતિઃ સ્ત્રિયામારકૂટો ન સ્ત્રિયામથ તામ્રકમ્

(૨.૮.૧૩૬૮)  શુલ્બં મ્લેચ્છમુખં દ્વ્યષ્ટવરિષ્ટોદુમ્બરાણિ ચ

(૨.૮.૧૩૬૯)  લોહોઽસ્ત્રી શસ્ત્રકં તીક્ષ્ણં પિણ્ડં કાલાયસાઽયસી

(૨.૮.૧૩૭૦)  અશ્મસારોઽથ મણ્ડૂરં સિંહાણમપિ તન્મલે

(૨.૮.૧૩૭૧)  સર્વં ચ તૈજસં લૌહં વિકારસ્ત્વયસઃ કુશી

(૨.૮.૧૩૭૨)  ક્ષારઃ કાચોઽથ ચપલો રસઃ સૂતશ્ચ પારદે

(૨.૮.૧૩૭૩)  ગવલં માહિષં શ◌ૃઙ્ગમભ્રકં ગિરિજાઽમલે

(૨.૮.૧૩૭૪)  સ્રોતોઞ્જનં તુ મૌવીરં કાપોતાઞ્જનયામુને

(૨.૮.૧૩૭૫)  તુત્થાઞ્જનં શિખિગ્રીવં વિતુન્નકમયૂરકે

(૨.૮.૧૩૭૬)  કર્પરી દાર્વિકાક્કાતોદ્ભવં તુત્થં રસાઞ્જનમ્

(૨.૮.૧૩૭૭)  રસગર્ભં તાર્ક્ષ્યશૈલં ગન્ધાશ્મનિ તુ ગન્ધિકઃ

(૨.૮.૧૩૭૮)  સૌગન્ધિકશ્ચ ચક્ષુષ્યાકુલાલ્યૌ તુ કુલત્થિકા

(૨.૮.૧૩૭૯)  રીતિપુષ્પં પુષ્પકે તુ પુષ્પકં કુસુમાઞ્જનમ્

(૨.૮.૧૩૮૦)  પિઞ્જરં પીતનં તાલમાલં ચ હરિતાલકે

(૨.૮.૧૩૮૧)  ગૈરેયમર્થ્યં ગિરિજમશ્મજં ચ શિલાજતુ
(૨.૮.૧૩૮૨)  વોલગન્ધરસપ્રાણપિણ્ડગોપરસાઃ સમાઃ
(૨.૮.૧૩૮૩)  ડિણ્ડીરોઽબ્ધિકફઃ ફેનઃ સિન્દૂરં નાગસંભવમ્
(૨.૮.૧૩૮૪)  નાગસીસકયોગેષ્ટવપ્રાણિ ત્રિષુ પિઞ્ચટમ્
(૨.૮.૧૩૮૫)  રઙ્ગવઙ્ગે અથ પિચુસ્તૂલોઽથ કમલોત્તરમ્
(૨.૮.૧૩૮૬)  સ્યાત્કુસુમ્ભં વહ્નિશિખં મહારજનમિત્યપિ
(૨.૮.૧૩૮૭)  મેષકમ્બલ ઊર્ણાયુઃ શશોર્ણં શશલોમનિ
(૨.૮.૧૩૮૮)  મધુ ક્ષૌદ્રં માક્ષિકાઽઽદિ મધૂચ્છિષ્ટં તુ સિક્થકમ્
(૨.૮.૧૩૮૯)  મનઃશિલા મનોગુપ્તા મનોહ્વા નાગજિહ્વિકા
(૨.૮.૧૩૯૦)  નૈપાલી કુનટી ગોલા યવક્ષારો યવાગ્રજઃ
(૨.૮.૧૩૯૧)  પાક્યોઽથ સર્જિકાક્ષારઃ કાપોતઃ સુખવર્ચકઃ
(૨.૮.૧૩૯૨)  સૌવર્ચલં સ્યાદ્રુચકં ત્વક્ક્ષીરી વંશરોચના
(૨.૮.૧૩૯૩)  શિગ્રુજં શ્વેતમારિચં મોરટં મૂલમૈક્ષવમ્
(૨.૮.૧૩૯૪)  ગ્રન્થિકં પિપ્પલીમૂલં ચટિકાશિર ઇત્યપિ
(૨.૮.૧૩૯૫)  ગોલોમી ભૂતકેશો ના પત્રાઙ્ગં રક્તચન્દનમ્
(૨.૮.૧૩૯૬)  ત્રિકટુ ત્ર્યૂપણં વ્યોપં ત્રિફલા તુ ફલત્રિકમ્
। ઇતિ વૈશ્યવર્ગઃ ૯, અત્ર મૂલશ્લોકાઃ ૧૧૧

## શૂદ્રવર્ગઃ।

(૨.૮.૧૩૯૭)  શૂદ્રાશ્ચાઽવરવર્ણાશ્ચ વૃષલાશ્ચ જઘન્યજાઃ   । અથ શૂદ્રવર્ગઃ
(૨.૮.૧૩૯૮)  આચણ્ડાલાત્ તુ સંકીર્ણા અમ્બષ્ઠકરણાઽદયઃ
(૨.૮.૧૩૯૯)  શૂદ્રાવિશોસ્તુ કરણોઽમ્બષ્ઠો વૈશ્યાદ્વિજન્મનોઃ
(૨.૮.૧૪૦૦)  શૂદ્રાક્ષત્રિયયોરુગ્રો માગધઃક્ષત્રિયાવિશોઃ
(૨.૮.૧૪૦૧)  માહિષોઽર્યાક્ષત્રિયયોઃ ક્ષત્તાઽર્યાશૂદ્રયોઃ સુતઃ
(૨.૮.૧૪૦૨)  બ્રાહ્મણ્યાં ક્ષત્રિયાત્ સૂતસ્તસ્યાં વૈદેહકો વિશઃ
(૨.૮.૧૪૦૩)  રથકારસ્તુ માહિષ્યાત્ કરણ્યાં યસ્ય સંભવઃ
(૨.૮.૧૪૦૪)  સ્યાચ્ ચણ્ડાલસ્તુ જનિતો બ્રાહ્મણ્યાં વૃષલેન યઃ
(૨.૮.૧૪૦૫)  કારુઃ શિલ્પી સંહતૈસ્તૈર્દ્વયોઃ શ્રેણિઃ સજાતિભિઃ
(૨.૮.૧૪૦૬)  કુલકઃ સ્યાત્ કુલશ્રેષ્ઠી માલાકારસ્તુ માલિકઃ
(૨.૮.૧૪૦૭)  કુમ્ભકારઃ કુલાલઃ સ્યાત્ પલગણ્ડસ્તુ લેપકઃ
(૨.૮.૧૪૦૮)  તન્તુવાયઃ કુવિન્દઃ સ્યાત્ તુન્નવાયસ્તુ સૌચિકઃ

(૨.૮.૧૪૦૯) રઙ્ગાજીવશ્ચિત્રકરઃ શસ્ત્રમાર્જોઽસિ ધાવકઃ
(૨.૮.૧૪૧૦) પાદકૃચ્ ચર્મકારઃ સ્યાદ્ વ્યોકારો લોહકારકઃ
(૨.૮.૧૪૧૧) નાડિન્ધમઃ સ્વર્ણકારઃ કલાદો રુક્મકારકઃ
(૨.૮.૧૪૧૨) સ્યાચ્છાઙ્ખિકઃ કામ્બવિકઃ શૌલ્બિકસ્તામ્રકુટ્ટકઃ
(૨.૮.૧૪૧૩) તક્ષા તુ વર્ધકિસ્ત્વષ્ટા રથકારશ્ચ કાષ્ઠતટ્
(૨.૮.૧૪૧૪) ગ્રામાઽધીનો ગ્રામતક્ષઃ કૌટતક્ષોઽનધીનકઃ
(૨.૮.૧૪૧૫) ક્ષુરી મુણ્ડી દિવાકીર્તિનાપિતાઽન્તાવસાયિનઃ
(૨.૮.૧૪૧૬) નિર્ણેજકઃ સ્યાદ્ રજકઃ શૌણ્ડિકો મણ્ડહારકઃ
(૨.૮.૧૪૧૭) જાબાલઃ સ્યાદજાજીવો દેવાજીવસ્તુ દેવલઃ
(૨.૮.૧૪૧૮) સ્યાન્ માયા શામ્બરી માયાકારસ્તુ પ્રતિહારકઃ
(૨.૮.૧૪૧૯) શૈલાલિનસ્તુ શૈલૂષા જાયાજીવાઃ કૃશાશ્વિનઃ
(૨.૮.૧૪૨૦) ભરતા ઇત્યપિ નટાશ્ચારણાસ્તુ કુશીલવાઃ
(૨.૮.૧૪૨૧) માર્દઙ્ગિકા મૌરજિકાઃ પાણિવાદાસ્તુ પાણિઘાઃ
(૨.૮.૧૪૨૨) વેણુધ્માઃ સ્યુર્વૈણવિકા વીણાવાદાસ્તુ વૈણિકાઃ
(૨.૮.૧૪૨૩) જીવાન્તકઃ શાકુનિકો દ્વૌ વાગુરિકજાલિકૌ
(૨.૮.૧૪૨૪) વૈતંસિકઃ કૌટિકશ્ચ માંસિકશ્ચ સમં ત્રયમ્
(૨.૮.૧૪૨૫) ભૃતકો ભૃતિભુક્ કર્મકરો વૈતનિકોઽપિ સઃ
(૨.૮.૧૪૨૬) વાર્તાવહો વૈવધિકો ભારવાહસ્તુ ભારિકઃ
(૨.૮.૧૪૨૭) વિવર્ણઃ પામરો નીચઃ પ્રાકૃતશ્ચ પૃથગ્જનઃ
(૨.૮.૧૪૨૮) નિહીનોઽપસદો જાલ્મઃ ક્ષુલ્લકશ્ચેતરશ્ચ સઃ
(૨.૮.૧૪૨૯) ભૃત્યે દાસેરદાસેયદાસગોપ્યકચેટકાઃ
(૨.૮.૧૪૩૦) નિયોજ્યકિઙ્કરપ્રૈષ્યભુજિષ્યપરિચારકાઃ
(૨.૮.૧૪૩૧) પરાચિતપરિસ્કન્દપરજાતપરૈધિતાઃ
(૨.૮.૧૪૩૨) માન્દસ્તુન્દપરિમૃજ આલસ્યઃ શીતકોઽલસોઽનુષ્ણઃ
(૨.૮.૧૪૩૩) દક્ષે તુ ચતુરપેશલપટવઃ સૂત્થાન ઉષ્ણશ્ચ
(૨.૮.૧૪૩૪) ચણ્ડાલપ્લવમાતઙ્ગદિવાકીર્તિજનઙ્ગમાઃ
(૨.૮.૧૪૩૫) નિપાદશ્વપચાવન્તેવાસિચાણ્ડાલપુક્કસાઃ
(૨.૮.૧૪૩૬) ભેદાઃ । કિરાતશબરપુલિન્દા મ્લેચ્છજાતયઃ
(૨.૮.૧૪૩૭) વ્યાધો મૃગવધાજીવો મૃગયુર્લુબ્ધકોઽપિ સઃ
(૨.૮.૧૪૩૮) કૌલેયકઃ સારમેયઃ કુક્કુરો મૃગદંશકઃ
(૨.૮.૧૪૩૯) શુનકો ભપકઃ શ્વા સ્યાદલર્કસ્તુ સ યોગિતઃ
(૨.૮.૧૪૪૦) શ્વા વિશ્વકદ્રુર્મૃગયાકુશલઃ સરમા શુની

(૨.૮.૧૪૪૧) વિટ્ચરઃ સૂકરો ગ્રામ્યો વર્કરસ્તરુણઃ પશુઃ

(૨.૮.૧૪૪૨) આચ્છોદનં મૃગવ્યં સ્યાદાખેટોમૃગયા સ્ત્રિયામ્

(૨.૮.૧૪૪૩) દક્ષિણાઽરુર્લુબ્ધયોગાદ્ દક્ષિણેર્મા કુરઙ્ગકઃ

(૨.૮.૧૪૪૪) ચૌરૈકાગારિકસ્તેનદસ્યુતસ્કરમોપકાઃ

(૨.૮.૧૪૪૫) પ્રતિરોધિપરાસ્કન્દિપાટચ્ચરમલિમ્લુચાઃ

(૨.૮.૧૪૪૬) ચૌરિકા સ્તૈન્યચૌર્યે ચ સ્તેયં લોપ્ત્રં તુ તદ્ધને

(૨.૮.૧૪૪૭) વીતંસસ્તૂપકરણં બન્ધને મૃગપક્ષિણામ્

(૨.૮.૧૪૪૮) ઉન્માથઃ કૂટયન્ત્રં સ્યાદ્ વાગુરા મૃગબન્ધની

(૨.૮.૧૪૪૯) શુલ્બં વરાટકં સ્ત્રી તુ રજ્જુસ્ત્રિષુ વટી ગુણઃ

(૨.૮.૧૪૫૦) ઉદ્ઘાટનં ઘટીયન્ત્રં સલિલોદ્વાહનં પ્રહેઃ

(૨.૮.૧૪૫૧) પુંસિ વેમા વાયદણ્ડઃ સૂત્રાણિ નરિ તન્તવઃ

(૨.૮.૧૪૫૨) વાણિર્વ્યૂતિઃ સ્ત્રિયૌ તુલ્યે પુસ્તં લેપ્યાઽઽદિકર્મણિ

(૨.૮.૧૪૫૩) પાઞ્ચાલિકા પુત્રિકા સ્યાદ્ વસ્ત્રદન્તાઽઽદિભિઃ કૃતા

(૨.૮.૧૪૫૪) જતુત્રપુવિકારે તુ જાતુપં ત્રાપુષં ત્રિષુ

(૨.૮.૧૪૫૫) પિટકઃ પેટકઃ પેટામઞ્જૂષાઽથ વિહઙ્ગિકા

(૨.૮.૧૪૫૬) ભારયષ્ટિસ્તદાઽઽલમ્બિ શિક્યં કાચોઽથ પાદુકા

(૨.૮.૧૪૫૭) પાદૂરુપાનત્ સ્ત્રી સૈવાઽનુપદીના પદાઽઽયતા

(૨.૮.૧૪૫૮) નદ્ધ્રી વર્ધ્રી વરત્રા સ્યાદશ્વાઽઽદેસ્તાઽની કશા

(૨.૮.૧૪૫૯) ચાણ્ડાલિકા તુ કણ્ડોલ વીણા ચણ્ડાલવલ્લકી

(૨.૮.૧૪૬૦) નારાચી સ્યાદેષણિકા શાણસ્તુ નિકષઃ કષઃ

(૨.૮.૧૪૬૧) વ્રશ્ચનઃપત્રપરશુરીપિકા તૂલિકા સમે

(૨.૮.૧૪૬૨) તૈજસાવર્તની મૂષા ભસ્ત્રા ચર્મપ્રસેવિકા

(૨.૮.૧૪૬૩) આસ્ફોટની વેધનિકા કૃપાણી કર્તરી સમે

(૨.૮.૧૪૬૪) વૃક્ષાદની વૃક્ષભેદી ટઙ્કઃ પાષાણદારણઃ

(૨.૮.૧૪૬૫) ક્રકચોઽસ્ત્રી કરપત્રમારા ચર્મપ્રભેધિકા

(૨.૮.૧૪૬૬) સૂર્મી સ્થૂણાઽયઃપ્રતિમા શિલ્પં કર્મ કલાઽઽદિકમ્

(૨.૮.૧૪૬૭) પ્રતિમાનં પ્રતિબિમ્બં પ્રતિમા પ્રતિયાતના પ્રતિચ્છાયા

(૨.૮.૧૪૬૮) પ્રતિકૃતિરર્ચા પુંસિ પ્રતિનિધિરુપમોપમાનં સ્યાત્

(૨.૮.૧૪૬૯) વાચ્યલિઙ્ગાઃ સમસ્તુલ્યઃ સદૃક્ષઃ સદૃશઃ સદૃક્

(૨.૮.૧૪૭૦) સાધારણઃ સમાનશ્ચ સ્યુરુત્તરપદે ત્વમી

(૨.૮.૧૪૭૧) નિભસંકાશનીકાશપ્રતીકાશોપમાઽઽદયઃ

(૨.૮.૧૪૭૨) કર્મણ્યા તુ વિધાભૃત્યાભૃતયો ભર્મ વેતનમ્

(૨.૮.૧૪૭૩)  ભરણ્યં ભરણં મૂલ્યં નિર્વેશઃ પણ ઇત્યપિ

(૨.૮.૧૪૭૪)  સુરા હલિપ્રિયા હાલા પરિસ્રુદ્ વરુણાત્મજા

(૨.૮.૧૪૭૫)  ગન્ધોત્તમાપ્રસન્નેરાકાદમ્બર્યઃ પરિસ્રુતા

(૨.૮.૧૪૭૬)  મદિરા કશ્યમદ્યે ચાપ્યવદંશસ્તુ ભક્ષણમ્

(૨.૮.૧૪૭૭)  શુણ્ડાપાનં મદસ્થાનં મધુવારા મધુક્રમાઃ

(૨.૮.૧૪૭૮)  મધ્વાસવો માધવકો મધુ માધ્વીકમદ્વયોઃ

(૨.૮.૧૪૭૯)  મૈરેયમાસવઃ સીધુર્મન્દકો જગલઃ સમૌ

(૨.૮.૧૪૮૦)  સંધાનં સ્યાદભિષવઃ કિણ્વં પુંસિ તુ નગ્નહૂઃ

(૨.૮.૧૪૮૧)  કારોત્તરઃ સુરામણ્ડ આપાનં પાનગોષ્ઠિકા

(૨.૮.૧૪૮૨)  ચપકોઽસ્ત્રી પાનપાત્રં સરકોઽપ્યનુતર્ષણમ્

(૨.૮.૧૪૮૩)  ધૂર્તોઽક્ષદેવી કિતવોઽક્ષધૂર્તો દ્યૂતકૃત્ સમાઃ

(૨.૮.૧૪૮૪)  સ્યુર્લગ્નકાઃ પ્રતિભુવઃ સભિકા દ્યૂતકારકાઃ

(૨.૮.૧૪૮૫)  દ્યૂતોઽસ્ત્રિયામક્ષવતી કૈતવં પણ ઇત્યપિ

(૨.૮.૧૪૮૬)  પણોઽક્ષેષુ ગ્લહોઽક્ષાસ્તુ દેવનાઃ પાશકાશ્ચ તે

(૨.૮.૧૪૮૭)  પરિણાયસ્તુ શારીણાં સમન્તાત્ નયનેઽસ્ત્રિયામ્

(૨.૮.૧૪૮૮)  અષ્ટાપદં શારિફલં પ્રાણિવૃત્તં સમાહ્વયઃ

(૨.૮.૧૪૮૯)  ઉક્તા ભૂરિપ્રયોગત્વાદેકસ્મિન્ યેઽત્ર યૌગિકાઃ

(૨.૮.૧૪૯૦)  તાદ્ધર્મ્યાદન્યતો વૃત્તાવૂહ્યા લિઙ્ગાઽન્તરેઽપિ તે

। ઇતિ શૂદ્રવર્ગઃ ૧૦ અત્ર મૂલશ્લોકાઃ ૪૬ ॥ ક્ષે ॥

(૨.૮.૧૪૯૧)  ઇત્યમરસિંહકૃતૌ નામલિઙ્ગાનુશાસને દ્વિતીયઃ કાણ્ડો

(૨.૮.૧૪૯૨)  ભૂમ્યાઽઽદિઃસાઽઙ્ગ એવ સમર્થિતઃ । અત્ર મૂલશ્લોકાઃ ૭૩૫

(૨.૮.૧૪૯૩)  સર્વે ચ મિલિત્વા ૭૫૦ પ્ર કા મૂ શ્લો ૨૮૧ । ક્ષે શ્લો ૧૮ સર્વે મિ ૨૯૯ ।

(૨.૮.૧૪૯૪)  એવં મૂ શ્લો ૧૦૧૭ ક્ષે શ્લો ૩૨ સર્વે મિ ૧૦૪૯

Encoded and proofread by Avinash Sathaye sohum at ms.uky.edu

Wed Aug 21 16:17:39 EDT 1996

Assisted by Pramod, SVGanesan

Avinash : Original 1940 edition by Panshikar,

except it was Nirnayasagar Press not Chaukhamba.

*Amarakosha Thesaurus Chapter 2*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*